CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

सं. ४९६
२४१२

4.5
NHP

श[illegible]डम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२४९२
अं० ४९६

ओ३म्

दर्शनमालायाः प्रथमम् पुष्पम्

शब्दखण्डम्

श्री पं० विश्वनाथपञ्चाननभट्टाचार्यकृतसकारिकामुक्तावलीन्यायसिद्धान्तमुक्तावल्याम् ।

अनेकविश्वविद्यालयोपाधिपरीक्षासु निर्धारितम् ।

"लक्ष्मी" इत्याख्ययाऽऽर्यभाषाटीकया परीक्षोपयोगिविविधटिप्पण्या च संवलितम् ।

श्री गणेश वर्णी दि. जैन (शोध) संस्थान

—टीकाकारः सम्पादकश्च—

अशोक चन्द्र गौड शास्त्री

व्याकरणाचार्य, डिप्लोमा इन रशियन

जूनियर रिसर्च फेलो

विश्वविद्यालय-अनुदान-आयोग :

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वाराणसी ।

—: प्रकाशक :—

आर्य्य-प्राच्य-विद्या-प्रकाशन-संस्थानम्

THE ARYA ORIENTAL PUBLISHING INSTITUTE

स्वामी विवेकानन्द नगरम्, सी० २७/२११-२५

वाराणसी — २२१००२ (उत्तर-प्रदेश)

संवत् २०३४ वैक्रमाब्दः सन् १९७७ ई० शाके १८९९

सृष्टि संवत् १९७२९४९०७८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ओ३म्

वर्ग संख्या सं॰ ८४५७ प्राप्ति-संख्या २४९२

ग्रन्थ-कार्ड

श्री गणेश वर्णी दि० जैन (शोध) संस्थान

ग्रन्थागार

नरिया, वाराणसी-५

ग्रन्थ नाम शब्दखण्डम्

लेखक पं० विश्वनाथ

करती,

ढंग से

स्वर्ग-

।

गए

हित,

vith

ील

था

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

काशी विद्यापीठ की सेवामें
सादर भेंट
अशोक चन्द्र गौड़ शास्त्री

ओ३म्

दर्शनमालायाः प्रथमम् पुष्पम्

शब्दखण्डम्

श्री पं० विश्वनाथपञ्चाननभट्टाचार्यकृतसकारिकावलीन्यायसिद्धान्त-मुक्तावल्याम्

अनेकविश्वविद्यालयोपाधिपरीक्षासु निर्धारितम् ।

"लक्ष्मी" इत्याख्ययाऽऽर्य भाषाटीकया परीक्षोपयोगिविविधटिप्पण्या च संवलितम् ।

२४१२
सं. ४१८

—टीकाकारस्सम्पादकश्च—
अशोक चन्द्र गौड़ शास्त्री
व्याकरणाचार्यः, डिप० इन रशियन
जूनियर रिसर्च फेलो
विश्वविद्यालय-अनुदान-आयोगः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी ।

—ः प्रकाशकः—
आर्य्य-प्राच्य-विद्या-प्रकाशन-संस्थानम्
THE ARYA ORIENTAL PUBLISHING INSTITUTE
स्वामी विवेकानन्द नगरम्,
वाराणसी—२२१००२ (उत्तर-प्रदेश)

संवत् २०३४ वैक्रमाब्दः] सन् १९७७ ई० [शाके १८९९
सृष्टि संवत् १९७२९४९०७८

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रकाशक
आर्य्यं प्राच्य विद्या प्रकाशन संस्थानम्
[The Arya Oriental Publishing institute]
स्वामी विवेकानन्द नगरम्, सी०२७/२११-२५
वाराणसी—२२१००२, उत्तर-प्रदेशः

प्रथम संस्करणम्
१९७७
मूल्यम् रु० ३.००
[अस्य पुनर्मुद्रणादिकाः सर्वेऽधिकाराः प्रकाशकाधीनाः]
(श्री द्वारकाप्रसाद जानकीदेवी ट्रस्ट के आर्थिक सहयोग से प्रकाशित)

मुद्रक
एजूकेशनल प्रिंटर्स
गोला दीनानाथ
वाराणसी—२२१००१, उत्तर-प्रदेशः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

OSM

THE SHABDAKHANDAM

OF

THE NYAYA-SIDDHANT-MUKTAVALI

OF

Shri Pt. Vishwanath Panchanan Bhattacharya
Edited with the LAKSHMI Hindi commentary
and with exhastive notes for students

By

Ashoka Chandra Gaur Shastri
Vyakaranacharya, Dip. in Russian
Junior Research Fellow of the University
Grants Commission of India
Sampurnanand Sanskrit University,
Varanasi

PUBLISHER

Arya Prachya Vidya Prakashan Sansthan
[The Arya Oriental Publishing Institute]
Swami Vivekanand Nagar,
Varanasi–221002 [U. P.] India

First Edition] 1977 [Price Rs. 3·00

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Publisher :
THE ARYA PRACHYA VIDYA PRAKASHAN SANSTHAN
[The Arya Oriental Publishing Institute]
Swami Vivekanand Nagar, C. 27/211-25,
Varanasi–221002, U. P.

First Edition
1977
Price–Rs. 3 (0
[All rights reserved by the Publisher]

[Published with the financial aid of the
Dvarakaprasad Janakidevi Trust]

Printed by :
Educational Printers
Gola Dinanath
Varanasi-221001, U. P.

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

* समर्पणम् *

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयकुलाधिपतिपदमलङ्कुर्वाणानाम् श्रीमताम् निरवद्यविद्याविद्यातमानमानसानां निरन्तरदेशसेवाव्रतविहितजनक्लेशहरणसमुद्यतानां विविधसुकृतसमुद्भूतसुयशोराशिप्रकाशितदिङ्मुखानां गीर्वाणवाणी-गौरवसमुन्नयनबद्धपरिकराणाम् भारतीयसभ्यतासंस्कृतिवेदज्ञानविज्ञानपौरस्त्यपाश्चात्य-नानाविध-चिकित्सा-कौशलविविधोद्योग-समुन्नयनोत्सुकानां सत्य-न्यायप्रतिष्ठागृहीतावताराणां, उत्तर-प्रदेश-राज्यपाल-महामहिम

डाक्टर मधु चेन्नारेड्डी

महाभागानाम्

करकमलयोः

ग्रन्थमिमम्

सादरम्

समर्पयति

अशोक चन्द्र गौड़ शास्त्री

व्याकरणाचार्यः, डिप० इन रशियन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रकाशकीय वक्तव्य

न्यायसिद्धान्तमुक्तावली के शब्दखण्ड की आर्यभाषा में "लक्ष्मी" नामक टीका प्रस्तुत करते हुए हमें अत्यन्त प्रसन्नता हो रही है। सबसे अधिक हर्ष का विषय तो यह है कि इस प्रकाशन के साथ ही हमारे आर्य्यं प्राच्य-विद्या-प्रकाशन-संस्थान का शुभारम्भ भी हो रहा है।

प्रस्तुत टीकाग्रन्थमें विषय को विस्तार से समझाया गया है। भूमिकामें भारतीय न्यायदर्शन के इतिहासपर विशद प्रकाश डाला गया है। नैयायिकों का संक्षिप्त इतिहास भी दिया गया है। शब्दविषयपर प्राच्य तथा पाश्चात्य वैज्ञानिक दृष्टि से व्याख्या प्रस्तुत की गयी है, जिससे छात्रोंके मस्तिष्क का विकास होगा।

अन्तमें परीक्षामें प्रश्नोत्तर लिखने की विधिपर भी प्रकाश डाला गया है। साथ ही शब्द के सम्बन्ध में विविध ग्रन्थों से सूक्तियों का भी संकलन किया गया है। इस प्रकार परीक्षार्थियों तथा अन्य लोगों के लिए भी यह ग्रन्थ अत्यन्त उपयोगी हो गया है।

इस ग्रन्थ के प्रकाशन में श्री द्वारका प्रसाद जानकीदेवी ट्रस्ट के स्वामी श्री द्वारकाप्रसादजी तथा श्री भारतभूषण अग्रवालजी ने तात्कालिक आर्थिक (ऋण) सहयोग प्रदान कर हमारी सहायता की, इसके लिए हम उनके अत्यन्त कृतज्ञ हैं। साथ ही हम एजूकेशनल प्रिंटर्स, गोला दीनानाथ, वाराणसी को विशेष धन्यवाद देते हैं, जिसने यथासमय इसके प्रकाशनमें शीघ्रता कर हमारा सहयोग किया।

इस सम्बन्धमें विद्वानों, छात्रों तथा अन्य हितैषी लोगों के जो सुझाव प्राप्त होंगे, हम उनका आदर करते हुए अगले संस्करणमें तदनुसार संशोधन करने का प्रयत्न करेंगे।

अशोक चन्द्र गौड़ शास्त्री
निदेशक
आर्य्यं प्राच्य विद्या प्रकाशन संस्थान
स्वामी विवेकानन्दनगरम्सी-२७।२११-२५,
वाराणसी।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयानुक्रमणिका

क्रमाङ्कः	विषयाः	पृष्ठाङ्काः
१.	"विदुषां शुभाशंसाः—	XI-XVIII
	(क) सम्पूर्णानन्द संस्कृतविश्वविद्यालयकुलपतीनां श्रीमताम्पण्डितकरुणापति-त्रिपाठि महाभागानां शुभाशंसा	
	(ख) सम्पूर्णानन्द संस्कृतविश्वविद्यालय–कुलसचिव–पदमलङ्कुर्वंताम् श्रीमताम् पण्डितविश्वम्भरनाथत्रिपाठिमहाभागानां शुभाशीर्वादाः	
	(ग) सम्पूर्णानन्दसंस्कृतविश्वविद्यालय - प्राचीनव्याकरणदर्शनागमविभागा-ध्यक्षाणां श्रीमताम्पण्डितरामप्रसादत्रिपाठी महाभागानां शुभाशीर्वादाः	
	(घ) सम्पूर्णानन्दसंस्कृतविश्वविद्यालय - न्याय - वैशेषिक - विभागाध्यक्षाणां श्रीमताम् पण्डितबदरीनाथशुक्लमहाभागानां शुभाशंसा	
	(ङ) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयनव्यव्याकरणविभागाध्यक्षाणां श्रीमता-म्पण्डित भूपेन्द्रपतित्रिपाठिमहाभागानां शुभाशंसा	
	(च) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयसाहित्यविभागाध्यक्षाणां श्रीमताम् पण्डितबटुकनाथशास्त्रि खिस्तेमहाभागानां शुभाशंसा	
	(छ) वाराणसेयनित्यानन्दसंस्कृतवेदमहाविद्यालयप्रधानाचार्याणाम् श्रीमताम्प-ण्डितशुकदेवझाशर्ममहाभागानां शुभाशीर्वादाः—	
	(ज) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयगवेषणालयनिदेशकानाम् श्रीमताम् डा० भागीरथप्रसादत्रिपाठिमहाभागानां शुभाशंसा	
२.	भूमिका—	
३.	शाब्दबोधे व्यापार निरूपणम्	१
४.	टीकाकृन्मङ्गलाचरणम्	१
५.	वृत्तिनिरूपणम्	४
६.	शक्तिनिरूपणम्	४–५
७.	शक्तिग्रहोपायनिरूपणम्	५–१७
८.	जातिशक्तिखण्डनम्	१८–२०
९.	पदनिरूपणम्	२१–२४
१०.	लक्षणानिरूपणम्	२४–३७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्रमाङ्काः	विषयाः	पृष्ठाङ्काः
११.	शाब्दबोधकारणनिरूपणम्	३८
१२.	(क) आसत्तिनिरूपणम्	३८–४२
	(ख) पदस्फोटखण्डनम्	४३–४५
१३.	योग्यतानिरूपणम्	४६–४७
१४.	आकाङ्क्षानिरूपणम्	४७–४९
१५.	तात्पर्यनिरूपणम्	५०–५२
१६.	परीक्षाप्रश्नोत्तरलेखनपद्धति	५३–६२
१७.	प्रश्नपत्राणि	६३–७७
१८.	परिशिष्टम्—	७७–८०
	(क) शब्दखण्डान्तर्गता कारिकावली	७७
	(ख) मुक्तावलीटीकान्तर्गताकारिकासूची	७८
	(ग) लक्ष्मी टीकान्तर्गता श्लोकसूची	७८
	(घ) शब्दमहत्त्वव्यञ्जक सूक्तयः	७९–८०

भूमिकागतविषयानुक्रमणिका

क्रमाङ्काः	विषयाः	पृष्ठाङ्काः
१.	न्यायविद्यापरिचयः।	XIX
२.	विद्याविभागवर्णनम्।	XX
३.	प्राचीनन्यायस्य वर्णनीयाः विषयाः।	XXII
४.	नव्यन्यायस्य वर्णनीयाः विषयाः।	XXII
५.	न्यायदर्शनस्य विकासस्तद्वेदमूलकत्वञ्च।	XXIII
६.	ईश्वरविषये गौतमन्यायदर्शनस्य प्रमाणम्।	XXIII
७.	ईश्वरविषये यजुर्वेदस्य प्रमाणानि।	XXIII
८.	ईश्वरविषये अथर्ववेदस्य प्रमाणानि।	XIV
९.	जीवानां नित्यत्वेऽनेकत्वे च ऋग्वेदस्य अथर्ववेदस्य च प्रमाणानि।	XIV
१०.	मनसः इन्द्रियाणाञ्च विषये गौतमन्यायदर्शनस्य प्रमाणानि।	XXV

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्रमांकाः	विषयाः	पृष्ठांकाः
११.	मनसः इन्द्रियाणाञ्च विषये यजुर्वेदस्य प्रमाणानि ।	XXV
१२.	गौतमन्यायदर्शनोक्तमोक्षविषये यजुर्वेदस्य ऋग्वेदस्य च प्रमाणानि ।	XXVI
१३.	पञ्चभूतविषये गौतमन्यायदर्शनस्य प्रमाणम् ।	XXVI
१४.	,, ,, यजुर्वेदऋग्वेदयोः प्रमाणानि ।	XXVI
१५.	पुनर्जन्मविषये गौतमन्यायदर्शनस्य प्रमाणम् ।	XXVII
१६.	,, ,, ऋग्वेदस्य प्रमाणानि ।	XXVII
१७.	,, ,, यजुर्वेदस्य प्रमाणानि ।	XXVII
१८.	,, ,, अथर्ववेदस्य प्रमाणानि ।	XXVII
१९.	ब्रह्मविषये उपनिषत्प्रमाणानि ।	XXVIII
२०.	वैशेषिकपदार्थविषये छान्दोग्योपनिषत्प्रमाणम् ।	XXIX
२१.	न्यायवैशेषिक दर्शनयोः प्राचीनत्वनिर्णयः ।	XXIX
२२.	प्राचीनन्यायप्रवर्तका आचार्याः	XXXI
	(१) आचार्यः गौतमः ।	XXXI
	(२) क – वात्स्यायनः ।	XXXII
	ख—वात्स्यायनस्यकालविषये पण्डितबलदेवोपाध्यायमतखण्डनम् ।	XXXII
	(३) भारद्वाज उद्योतकरः ।	XXXIV
	(४) वाचस्पति मिश्रः ।	XXXV
	(५) क—जयन्त भट्टः ।	XXXV
	ख—जयन्त भट्टस्य कालविषये पण्डितबदरीनाथशुक्ल-पण्डितबलदेवोपाध्याययोर्मतखण्डनम् ।	XXXVII
	(६) क—भासर्वज्ञः	XXXVII
	ख—भासर्वज्ञस्य कालविषये पण्डितज्वालाप्रसादगौड—पण्डितबलदेवोपाध्याययोर्मतखण्डनम् ।	XXXVII
	(७) क—उदयनाचार्यः	XXXVII
	ख—उदयनाचार्यस्य कालविषये पण्डितबलदेवोपाध्यायमतखण्डनम् ।	XXXVII
	(८) वरदराजः ।	XXXVIII
	(९) केशवमिश्रः ।	XXXIX

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्रमाङ्काः	विषयाः	पृष्ठाङ्काः
२३.	नवन्यायप्रवर्तकाः आचार्याः—	XXXIX
	(१) क—गङ्गेशोपाध्यायः।	XXXIX
	ख—गङ्गेशोपाध्यायस्य कालविषये पण्डितबदरीनाथशुक्लमतखण्डनम्।	XXXIX
	(२) पक्षधर मिश्रः।	XL
	(३) वासुदेव सार्वभौमः।	XLI
	(४) रघुनाथ शिरोमणिः।	XLI
	(५) मथुरानाथ तर्कवागीशः।	XLII
	(६) जगदीश तर्कालङ्कारः।	XLII
	(७) गदाधर भट्टाचार्यः।	XLII
	(८) वल्लभाचार्यः।	XLIII
	(९) अन्नम्भट्टः।	XLIV
	(१०) श्री पं० विश्वनाथपञ्चानन भट्टाचार्यः।	XLIV
	(११) लौगाक्षिभास्करः।	XLVI
	(१२) शशधरः।	XLVI
	(१३) माधवाचार्यः।	XLVII
२४.	वैशेषिक दर्शनस्य विकासः।	XLVII
२५.	वैशेषिक दर्शनस्याऽऽचार्याः—	XLVIII
	(१) कणादः।	XLVIII
	(२) आत्रेयः।	L
	(३) रावणः।	L
	(४) प्रशस्तपाद।	L
	(५) शिवादित्य मिश्रः।	LII
२६.	को नाम शब्दः।	LIV
२७.	शब्दखण्डस्य वैशिष्ट्यम्।	LXIII
२८.	वर्तमानटीकायाः महत्त्वम्।	LXIV
२९.	कृतज्ञता-प्रकाशः।	LXIV

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

महामहिम राज्यपाल महोदय की शुभाशंसा

GOVERNOR
UTTAR PRADESH

RAJ BHAVAN
LUCKNOW
मई 9, 1977

महामहिम डा० मधु चेन्ना रेड्डी
राज्यपाल, उत्तर-प्रदेश

अभी हाल ही में, अल्पवयस्क श्री अशोक चन्द्र गौड़ शास्त्री ने जब मुझसे राजभवन में भेंट करके, "न्यायसिद्धान्त-मुक्तावली" के "शब्दखण्डम्" पर अपनी टीका पुस्तिका भेंट किया, तो मैं हर्ष और विस्मय से भर गया। थोड़े ही परिचय से मुझे ज्ञात हो गया कि श्री गौड़ भारतीय परम्परा और संस्कृति के परिवेश में एक जागरूक, अनुशासित एवम् महत्त्वाकांक्षी विद्यार्थी हैं तथा उनकी योजनाओं व महत्त्वाकांक्षाओं का क्षेत्र विशाल है। "शब्दखण्डम्" जैसे क्लिष्ट तथा दुरूह विषय पर रोचक टीका प्रस्तुत कर के, उन्होंने शब्दों का दर्शनशास्त्र तथा उनके मनोवैज्ञानिक पक्ष को उजागर किया है, जो कि भारतीय संस्कृति की अपनी एक मौलिक देन है। मैं आशा करता हूँ कि यह रचना आधुनिक भाषाविदों तथा शिक्षाशास्त्रियों के लिए नये क्षितिज उन्मुक्त करने में सहायक होगी।

मैं श्री गौड़ के साथ ही "आर्यं प्राच्य विद्या प्रकाशन संस्थानम्" वाराणसी को भी इस अभिनव अनुष्ठान के लिए बधाई देता हूँ, जिन्होंने अपने अतीत के गौरवमय पक्ष को जनसाधारण के द्वार तक पहुँचा कर राष्ट्र की अनुपम सेवा की है।

हस्ताक्षर
म० चेन्ना रेड्डी
राज्यपाल, उत्तर-प्रदेश

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विदुषां शुभाशंसाः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयकुलपतिपदमलङ्कुर्वताम्
श्रीपण्डित करुणापतित्रिपाठिमहाभागानां शुभाशंसा

श्रुतम् मे गोपाय
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी—२२१००२

करुणापति त्रिपाठी
कुलपतिः

फोन { आवास ६५८७५. कार्यालय ६२२४२

फरवरी २८-१९७५.

अतीव हर्षस्याऽयं विषयो यच्छ्रीमदशोकचन्द्रगौडशास्त्री न्याय-द्धान्तमुक्तावल्याः शब्दखण्डस्य "लक्ष्मी" नाम्नीं व्याख्यात्मिकां टीकां विधपरीक्षार्थिच्छात्राणामुपकाराय महता श्रमेण निर्मितवान्। अस्यां कायां दुरूहविषयस्य सुबोधरीत्या एतादृशी व्याख्या कृता विद्यते या द्यार्थिजनबोध्याऽस्ति। मन्ये एतद्ग्रन्थप्रकाशनेन जिज्ञासूनां छात्राणां ज्ञानुपकारो भविष्यति। कामयेऽस्य ग्रन्थस्याऽधिकाधिकः प्रचारो भव-तिति। गौड़ो भविष्यति कालेऽप्येतादृशं प्रयासं करिष्यतीति कल्पयति।

करुणापति त्रिपाठी
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्पूर्णानन्दसंस्कृतविश्वविद्यालय कुलसचिवानाम् श्रीमताम् पण्डित-
विश्वम्भरनाथ त्रिपाठिमहाभागानां शुभाशीर्वादाः

कुल सचिवः
सम्पूर्णानन्द-संस्कृत विश्वविद्यालयः
वाराणसी-२२१००२

दूरलेखः—'श्रुतम्'
दूरभाषः { कार्यालय-६४०८१
आवास-६४०५३ }

पत्र संख्या
दिनाङ्क : २७-४-७७

श्री अशोक चन्द्र गौड़ शास्त्री द्वारा अनूदित न्यायसिद्धान्तमुक्तावली के "शब्दखण्डम्" का मैंने भलीभांति अवलोकन किया। इस ग्रन्थ में मूल के साथ हिन्दी में विश्वनाथ के मर्म का प्रौढ रूप से उद्घाटन हुआ है। यद्यपि न्यायशास्त्र के पारिभाषिक शब्दों से अपरिचित हिन्दी भाषा-भाषी को कहीं कहीं यह ग्रन्थ दुरूह प्रतीत होगा, तथापि संस्कृत-अध्येता छात्रों के लिए अत्यधिक उपयोगी तथा लाभप्रद होगा। मुझे पूरा विश्वास है कि इससे छात्र-जगत अपनी कठिनाइयों को दूर करने में समर्थ होगा। आशा है श्री गौड़ भविष्य में भी संस्कृत के अन्य दुरूह ग्रन्थों को अनूदित कर हिन्दी भाषा के वैभव को बढ़ाते रहेंगे।

विश्वम्भरनाथ त्रिपाठी
कुल सचिवः
सम्पूर्णानन्द संस्कृत विश्वविद्यालयः
वाराणसी।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्पूर्णानन्द संस्कृत विश्वविद्यालयस्य प्राचीनव्याकरणदर्शनागम विभागाध्यक्ष-पदमलङ्कुर्वतां डाक्टर रामप्रसादत्रिपाठिमहाभागानां शुभाशीर्वादाः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वाराणसी १४-३-१९७५

आयुष्मान् मेधावी श्रीमदशोकचन्द्रगौड आचार्यपरीक्षायां नियतं न्यायसिद्धान्तमुक्तावलीग्रन्थमधीयान एव तत्रत्यशब्दखण्डमुद्दिश्य "लक्ष्मी" नामिकां व्याख्यां सरलया सुबोधया हिन्दी भाषया व्यरीरचदिति महतः प्रमोदस्य विषयः। व्याख्या चैषा विविधपरीक्षार्थिच्छात्राणां कृते महते उपकाराय भविष्यतीत्यत्र नाऽस्ति मनागपि संशीति-लेशः।

व्याख्याता चाऽयमशोकचन्द्र इतोऽपि अधिकं सफलं प्रयत्नं करिष्यन् आत्मानं देशं राष्ट्रञ्च महताऽभ्युदयेन योजयेदित्येवं शुभाशीर्भिरेनं वर्धयति।

रामप्रसाद त्रिपाठी

व्याकरणन्यायाचार्यः, वाचस्पतिः (डी० लिट्०)

आचार्योऽध्यक्षश्च

प्राचीनव्याकरण-दर्शनागमविभागस्य

सम्पूर्णानन्द-संस्कृत विश्वविद्यालयः

वाराणसी।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य न्यायवैशेषिकविभागाध्यक्षाणां श्रीपण्डित बदरीनाथशुक्लमहाभागानां शुभाशंसा

श्रुतम् मे गोपाय

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वाराणसी–२२१००२

दिनांक: १२-८-७५

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्नातकेन श्रीमताऽशोकचन्द्र-गौडशास्त्रिणा न्यायसिद्धान्तमुक्तावलीशब्दखण्डस्य "लक्ष्मी" नाम्नी हिन्दी व्याख्या विलिखिता। व्याख्यायाः कियानंशस्तेन मत्समक्षमधीतः। व्याख्यायै तेन महतोत्साहेन श्रमोऽनुष्ठितः। तदीयश्रमस्तदीयां शास्त्र-परिशीलनाभिरुचिं विस्पष्टं व्यनक्ति।

मन्ये, व्याख्ययाऽनया विस्तारं गतया छात्राणाम्महानुपकारो भवि-ष्यति, श्रीगौडस्य ग्रन्थप्रणयनोत्साहश्चाप्युत्तरोत्तरं वर्धयिष्यते। यत्फलतया श्रीगौडो यथाकालं प्रशस्यां पाण्डित्यकीर्तिमधिकर्तुम्प्रभविष्यतीति।

बदरीनाथ शुक्लः
न्यायवेदान्ताचार्यः, एम० ए०
आचार्योऽध्यक्षश्च
न्यायवैशेषिकविभागस्य
सम्पूर्णानन्द संस्कृत विश्वविद्यालयः
वाराणसी।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्पूर्णानन्द संस्कृतविश्वविद्यालयस्य नव्यव्याकरणविभागाध्यक्षपदमलङ्कुर्वतां श्रीमताम्पण्डित भूपेन्द्रपतित्रिपाठिमहाभागानां शुभाशंसा

श्रुतम् मे गोपाय

सम्पूर्णानन्द संस्कृत विश्वविद्यालयः
वाराणसी—२२१००२

दिनाङ्कः १८ मार्च १९७५ ई०

श्री अशोकचन्द्रगौडकृता न्यायसिद्धान्तमुक्तावल्याः शब्दखण्डस्य "लक्ष्मी नाम्नी हिन्दी टीका मया बहुत्र स्थलेष्ववलोकिता।

मेधाविनाऽनेन यथाशक्ति सम्बद्धविषयानात्मासात्कृत्य स्फोरयितुम्प्रत्नोऽकारि।

नूनम् श्रमोऽमुष्य सर्वथा प्रशंसार्हः, टीका चाद्यतनच्छात्राणां कृते महती उपकारिका। भूतभावनो भगवान् विश्वनाथः सर्वथा शुभं विदध्यादिति मे शुभाशंसा।

भूपेन्द्रपति त्रिपाठी
आचार्योऽध्यक्षश्च
नव्यव्याकरण विभागस्य
सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः
वाराणसी।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्पूर्णानन्द संस्कृतविश्वविद्यालयस्य साहित्यविभागाध्यक्षपदमलङ्कुर्वाणानां
श्रीमतां पं० बटुकनाथशास्त्रि खिस्तेमहाभागानां शुभाशंसा

श्रुतम् मे गोपाय
सम्पूर्णानन्द संस्कृत विश्वविद्यालय
वाराणसी—२२११०२

दिनाङ्कः २८-३-७५

श्रीमता बुद्धिमता श्रीमदशोकचन्द्रगौडशास्त्रिणा निबद्धांमुक्तावलीशब्दखण्डव्याख्यां "लक्ष्मी" समाख्यां स्थालीपुलाकन्यायेन विनिभाल्य समाश्वस्तचेता अभवम् ।

साम्प्रतिकानां सरलार्थजिज्ञासूनां कृते टीका नितान्तमुपकारिणी सेयमिति निर्विचिकित्सं मम प्रतिभाति। टीकामिमां सम्प्रचार्य लेखकः सुयशोभाजनम्वोभूयात् ।

इति ।

बटुकनाथ शास्त्री खिस्ते
आचार्योऽध्यक्षश्च
साहित्यविभागस्य
सम्पूर्णान्द संस्कृत विश्वविद्यालयः
वाराणसी ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वाराणसेयनित्यानन्दवेदमहाविद्यालयस्य प्रधानाचार्यपदमलङ्कुर्वाणानाम्
श्रीमताम्पण्डितशुकदेवझाशर्ममहाभागानाम् शुभाशीर्वादाः

फोन नं० : ४०५८

नित्यानन्द वेद महाविद्यालय
(संस्कृत महाविद्यालय)

ओसानगंज, वाराणसी
दिनांक १४-७-७५

श्री अशोकचन्द्रगौडशास्त्रिकृता न्यायसिद्धान्तमुक्तावल्याः शब्दखण्डस्य 'लक्ष्मी' समाख्या भाषा टीकाऽतिमनोरमा वर्तते ।

इयमन्तेवासिनां कृते सर्वथोपयोगितेति मे मतिः

शुकदेव झा
व्याकरणाचार्यः,
प्रधानाचार्यः
नित्यानन्दवेद महाविद्यालयस्य
वाराणसी ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयगवेषणालयनिदेशकपदमलङ्कुर्वताम्
डा० भागीरथप्रसादत्रिपाठिमहाभागानां शुभाशंसा

डा० भागीरथप्रसादत्रिपाठी 'वागीशःशास्त्री' दूरभाषः ६४०१४ दूरलेखः श्रुतम्

गवेषणालय निदेशकः सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वाराणसी— २

दिनाङ्क १०-८-१९७५ ई०

प्रथितो न्यायसिद्धान्तमुक्तावल्याः महिमा पण्डितमण्डलीषु। यद्यपि सन्त्यनेकाः व्याख्याः लोकप्रियाया अस्याः गीर्वाणवाणीमय्यो राष्ट्रभाषामय्यश्च, तथापि नवनीतमतीनां छात्राणामुपकाराय नासीत् तादृशी काचन व्याख्या राष्ट्रभाषामयी, या परीक्षाम्बुधितितीर्षतां पोतरूपा सिद्धा स्यात्। नैयून्यमिदमेव परिलक्ष्य बुद्धिमता श्रीमताऽशोकचन्द्रगौड़शास्त्रिणा मुक्तावल्याः शब्दखण्डमात्र राष्ट्रभाषयाऽनूद्य महदुपकृतं सुकृतिना। जिज्ञासवो ग्रन्थरत्नमिदमङ्गीकृत्याऽनुवादकं नूनं प्रोत्साहयिष्यन्ति। यस्मादसावेवंविधानन्यानपि सुरगिर आकरग्रन्थमणीननूद्य लोकमुपकुर्यादिति।

भागीरथप्रसादत्रिपाठी "वागीशःशास्त्री"
निदेशकः गवेषणालयस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वाराणसी।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भूमिका

वेदा अस्माकं भारतीयसंस्कृतेर्मूलभूता महानिधयः। तेषां व्याख्यानभूतान्येव सर्वाणि शास्त्राणि ज्ञानविज्ञानमयानीति न तिरोहितम् विदुषाम्। कालान्तरेण मनुष्याणाम्बुद्धिस्मृतिप्रतिभादिशक्तिह्रासात् मूलवेदज्ञानेऽसामर्थ्यान्महर्षिभिः वेदार्थ-ज्ञानार्थमेव नानाविधानि व्याख्यानशास्त्राणि प्रवर्तितानि। तदुक्तम् निरुक्ते:-

"साक्षात्कृतधर्माण: ऋषयो बभूवु, तेऽवरेभ्योऽसाक्षात्कृत—
धर्मभ्य: उपदेशेन मन्त्रान् सम्प्रादु:। उपदेशाय ग्लायन्तो—
ऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि
च, बिल्मं भिल्मं भासनमिति वा।।" निरुक्तम् अ० १।पा० ६।खण्डम् ६।।

वेदज्ञानार्थमेव वेदाङ्गानि शिक्षाव्याकरणनिरुक्तच्छन्दोज्यौतिषकल्पाख्यानि ऋषिभिः प्रणीतानि। कालान्तरे पुनर्मानवशक्तिह्रासात् वेदाङ्गैरपि वेदार्थं ज्ञानाऽनुगमाऽभावात् न्यायवैशेषिकसांख्ययोगमीमांसावेदान्ताख्यानि वेदोपाङ्गानि प्रादुर्भूतानि। तेषु मुख्यमुपाङ्गं वेदानाम्—न्यायशास्त्रम्, न्यायविद्या वेति।

सेयं न्यायविद्या आन्वीक्षिकी, हेतुविद्या, वादविद्या, तर्कविद्येति बहुभिर्नामभिः काले काले प्रतिष्ठिता। न्यायशास्त्रोक्तप्रत्यक्षानुमानोपमानशब्दैरवगतविषयस्य 'अनु' पश्चादीक्षणम् पर्यालोचनम् ज्ञानम् वेति अन्वीक्षा, तया प्रवर्तिता विद्या आन्वीक्षिकी, एवम् हेतुभिः प्रवर्तिता विद्या हेतुविद्या, वादैः प्रवर्तिता विद्या वादविद्या, तर्कैः प्रवर्तिता विद्या तर्कविद्येति बहुलं व्याख्यायते। सेयं तर्कविद्या समस्तज्ञानविज्ञानहेतुभूता सकलशास्त्रतत्त्वार्थज्ञानसाधिका धर्माधर्मविवेचिनी भौतिकाऽऽध्यात्मिकोपलब्धिसहायिका इति सर्वैर्महर्षिभिः प्राचीनैर्नवीनैर्विद्वद्भिश्च स्वीक्रियतेतमाम्। तदुक्तम् कौटिल्यार्थशास्त्रे :—

"प्रदीपस्सर्वविद्यानामुपायस्सर्वकर्मणाम्।
आश्रयस्सर्वधर्माणां शाश्वदान्वीक्षिकी मता।।

—कौटिल्यार्थशास्त्रे—१ अधिकरणे। प्रथम प्रकरणे। २ अध्याये।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आन्वीक्षिकी विद्या सर्वासामपि विद्यानां कृते दीपक इव प्रतिभाति, सर्वकर्मानुष्ठानस्य साधनमार्गः, सर्वधर्माणामाश्रयश्चेति। आन्वीक्षिकीं विद्यां विना धर्मस्य कथमपि बोधो न भवति। तदुक्तम् वैवस्वतमनुना :—

"आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥"

—मनुस्मृतौ १२।१०६॥

यस्तर्केण धर्माधर्मयोरनुसन्धानं करोति स एव धर्मं ज्ञातुमर्हति, नान्यः। यथा धर्मेऽस्य तर्कस्य न्यायस्य वा ऽनिवार्या प्रवृत्तिः, तथैवाऽन्यत्र ज्ञानेऽनुसन्धानेऽप्यप्रतिहता गतिरिति विज्ञेयम्। एतेन न्यायशास्त्रस्य वैशिष्ट्यं स्पष्टमेव। चतुर्दशसु किं वाऽष्टादशसु विद्यास्वपि न्यायस्य नाम स्मर्यते। तथा च याज्ञवल्क्यः आह :—

"पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिता।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥"

—याज्ञवल्क्यस्मृतौ १।३॥

पुराणम्, तर्कः, मीमांसा, धर्मशास्त्रम्, चत्वारो वेदाः, शिक्षाव्याकरणनिरुक्तच्छन्दोज्योतिषकल्पाख्यानि षडङ्गानि मिलित्वा चतुर्दश सर्वासां विद्यानां स्थानभूतानि सन्तीति।

विद्यास्थानानामुपर्युक्ता परिभाषा अपूर्णा, तत्रायुर्वेदधनुर्वेदगान्धर्ववेदाऽर्थवेदादिचतुर्णामुपवेदाख्यविद्यास्थानानामग्रहणात्। वस्तुतस्तु विद्यानामष्टादशभेदाः प्राचीनैराम्नायन्ते। तथा हि—

चत्वारो वेदाः—ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च।

चत्वार उपवेदाः—आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थवेदश्च।

षडङ्गानि—शिक्षा, व्याकरणम्, निरुक्तम्, छन्दः शास्त्रम्, ज्योतिषम्, कल्पश्चेति।

उपाङ्गानि—न्यायवैशेषिकम्, सांख्ययोगम्, मीमांसावेदान्तम् द्वयोर्द्वयोर्योगात् त्रीणि।

व्यवहारनिर्णायकम् धर्मशास्त्रम् सेतिहासम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्यवहारनिर्णये सर्वत्रैवेतिहासोपन्यासात् पुराणशब्देन इतिहासस्यैव ग्रहणम् । तथा चोक्तम् :—

ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीरिति ।।"

।। आश्वलायन गृह्यसूत्रे ३।३।१।।

अर्थात् ऐतरेयशतपथादीनां ब्राह्मणानामेव इतिहास-पुराण-कल्पगाथा-नाराशंसीति पञ्च नामानि सन्ति । श्रीमद्भागवतादीनि पुराणपदेन कथमपि व्यवहर्तुं न शक्यन्ते ।

केषाञ्चिन्मते चतुर्णां वेदानां वेदशब्देन ग्रहणात् वेद एकः, उपवेदाश्चत्वारः, अङ्गानि षट्, उपाङ्गानि षट्, धर्मशास्त्रमेकम्-सर्वेषां योगोऽष्टादश भवति । एवमष्टादशविद्यास्थानानि समाम्नायन्ते ।

तथोक्तम् वायुपुराणे—

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रम्पुराणञ्च विद्यास्त्वेताश्चतुर्दश ।।
आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः ।
अर्थशास्त्रं चतुर्थं तु विद्यास्त्वष्टादशैव तु ।।"

—वायुपुराणे ६१।७८-७९ ।।

तथैव विष्णुपुराणेऽप्यष्टादशविद्यास्थानानां वर्णनं दृश्यते । तथा हि—

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रञ्च विद्याः ह्येताश्चतुर्दश ।।
आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः ।
अर्थशास्त्रं चतुर्थन्तु विद्याः ह्यष्टादशैव ताः ।।"

—विष्णुपुराणे ३ अंशे ६ अ०।२८,२९

एवं बहुविधेषु विद्यास्थानविभागेषु सर्वत्रैव न्यायविद्यायाः समावेशो दृश्यते । एतेन न्यायविद्यायाः वैशिष्ट्यं व्याख्यातम् भवति । तदुक्तम् गङ्गेशोपाध्यायेन तत्त्वचिन्तामणौ ग्रन्थारम्भे —

"अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुः अष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय ।।"

—तत्त्वचिन्तामणौ/प्रामाण्यवादे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कोनाम न्याय इति जिज्ञासायां न्यायसूत्रभाष्यकारो वात्स्यायनः प्राह—

"प्रमाणैरर्थपरीक्षणं न्याय" इति ॥

अर्थस्य यथार्थानुभवः प्रमा, प्रमाकरणञ्च प्रमाणम्। अनुभवो नाम स्मृतिव्यतिरिक्तं ज्ञानम्। ज्ञातविषयं ज्ञानं स्मृतिः। यतो हि शास्त्रमिदं विशेषतः प्रमाणानां स्वरूपं वर्णयति, प्रमाणैश्च पदार्थानां निर्णयं विदधाति। अत एवेदं "दर्शन" नाम्नाऽप्यभिधीयते। दर्शनञ्च दृश्यन्ते अनुभूयन्ते साक्षात्क्रियन्ते पदार्था अनेनेति व्युत्पत्त्या दर्शनशब्दस्य करणपदार्थविबोधकशास्त्ररूपं पर्यवस्यति। ततश्चेदं न्यायदर्शनं साक्षाद् दर्शनकक्षामवगाहते।

प्रमाणमन्तरेण न कस्याऽपि वस्तुनो ज्ञानं शक्यम्, ज्ञानमन्तरा च न कस्याऽपि पुरुषस्य कस्मिंश्चिदपि कर्मणि प्रवृत्तिर्निवृत्तिर्वा भवितुमर्हति। प्रमाणद्वारा ज्ञानावाप्त्यर्थं चत्वारि वस्तून्यपेक्ष्यन्ते—प्रमाता, प्रमाणम्, प्रमेयम्, प्रमितिश्चेति। यः पदार्थान् वेत्ति सः प्रमाता, येन पदार्थानां ज्ञानं भवति तत् प्रमाणम्, यत् प्रमाणैर्ज्ञेयं वस्तु तत् प्रमेयम्, प्रमातृप्रमाणप्रमेयानां यथायोगं सम्बन्धादुत्पद्यमानं ज्ञानं प्रमितिरित्युच्यते। प्रमितिविषयीभूतः पदार्थश्च सुखदुःखयोरन्यतरस्य कारणम्। पदार्थस्य ज्ञानानन्तरं प्रमात्रा तस्याप्त्यर्थं क्रियमाणः प्रयत्नः प्रवृत्तिः, त्यागार्थञ्च क्रियमाणः प्रयत्नो निवृत्तिः। प्रमाणमेव हि पदार्थानामस्तित्वमभावञ्च द्योतयति प्रदीपवत्। तथा हि यथा प्रदीपः गृहे प्रकाशद्वारा उपस्थितम् पदार्थं द्योतयति तथैवाऽनुपस्थितस्य पदार्थस्याऽभावमपि द्योतयति। एवमेव सतो ग्राहकं प्रमाणमसदपि ग्राहयति।

प्राचीनन्यायदर्शने प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानाख्यानां षोडशपदार्थानाम्, प्रत्यक्षानुमानोपमानशब्दाख्यानां चतुर्विधप्रमाणानामात्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिप्रेत्यभावफलदुःखापवर्गरूपाणां द्वादशविधप्रमेयाणाम् पञ्चमहाभूतादीनाञ्च विशदं विवेचनमस्ति।

नव्यन्याये तु द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्यानाम् सप्तपदार्थानां पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनसां नवद्रव्याणाम्, चतुर्विंशतिगुणानां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चतुर्विधप्रमाणानाम्, संयोग-संयुक्तसमवाय-संयुक्तसमवेतसमवाय-समवाय-समवेत-समवाय-विशेषणविशेष्यभावरूपाणां षड्विधसन्निकर्षाणां, व्याप्तेः, प्रतिज्ञाहेतूदाहरणोपनयनिगमनाख्यानाम् न्यायावयवादीनाञ्च सम्यग् विवेचनमस्ति ।

न्यायदर्शनस्य विकासः

न्यायदर्शनस्योत्पत्तिः कदा सञ्जातेति विषये निश्चितरूपेण किञ्चित्कथनन्तु दुष्करमेव, तथापीदं वक्तुं शक्यते यद् वेदेष्वेव न्यायशास्त्रस्य मूलं गुप्तमस्ति । तदुक्तम् गौतमीयन्यायदर्शने—

"ईश्वरः कारणम् पुरुषकर्माफल्यदर्शनात्"

—गौ० न्याय० ४।१।१९

इति सूत्रे ईश्वरसत्ता स्वीकृता । एतस्य मूलं वेदेषु सुस्पष्टं दृश्यते । तथा च यजुर्वेदे समाम्नायते—

परीत्यं भूतानि परीत्यं लोकान् परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि सं विवेश ॥

॥ यजु० अ० ३२।मं० ११ ॥

न तस्यं प्रतिमाऽअस्ति यस्य नाम महद्यशः ।
हिरण्यगर्भऽइत्येष मा मा हिंसीदित्येषा यस्मान्न जातऽइत्येषः ॥

॥ यजु० अ० ३२।मं० ३ ॥

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥

॥ यजु० अ० ४० । मं० ८ ॥

एवमेवास्य ब्रह्मणो वैशिष्ट्यमथर्ववेदेऽपि समाम्नायते—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

महद्यक्षं भुवनस्य मध्ये तपसि क्रान्तं सलिलस्य पृष्ठे ।
तस्मिञ्छ्रयन्ते य उ के च देवा वृक्षस्य स्कन्धः परित इव शाखाः ॥

॥ अथर्व० कां० १० । अनु० ४। सूक्त ७ । मं० ३८ ॥

न द्वितीयो न तृतीयश्चतुर्थो नाप्युच्यते ।
न पञ्चमो न षष्ठः सप्तमो नाप्युच्यते ॥
नाष्टमो न नवमो दशमो नाप्युच्यते ॥
तमिदं निगतं सहः स एष एक एकवृदेक एव ॥

॥ अथर्व० कां १३ । अनु० ४ । सू० २ । मं ३, ४, ५, ७ ॥

एतेषु मन्त्रेषु परमेश्वरस्यानादित्वं सर्वशक्तिमत्त्वं, सर्वव्यापकत्वं, सृष्टिकर्तृत्वमेकत्वं, जन्ममृत्युरहितत्वमभौतिकत्वञ्च स्पष्टमेव प्रतीयते । सर्वं चेदं न्यायशास्त्रस्य मूलं सिद्धान्तम्प्रकाशयति । जीवानां नित्यत्वेऽनेकत्वे च बहवो मन्त्राः वेदेषूपलभ्यन्ते । तथा च ऋग्वेदे समाम्नायते—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥

॥ ऋक्० १ मण्डले । २२ अ० । १६४ सू० । मं० २० ॥

अनच्छये तुरगातु जीवमेजद् ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ॥

॥ ऋक्० १ मण्डले । २२ अ० । १६४ सूक्ते । मन्त्रम् ३० ॥

एवमथर्ववेदेऽपि समाम्नायते—

देवाः पितरो मनुष्याः गन्धर्वाप्सरसश्च ये ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ॥

॥ अथर्व० काण्ड ११ । अनु० ४।७ सूक्ते । मन्त्रम् २७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न्यायदर्शने मनसः इन्द्रियाणाञ्च विषये विस्तृतरूपेण निरूपणं वर्तते। तद्यथा—

"घ्राणरसनचक्षुस्त्वक्श्रोत्रेन्द्रियाणि भूतेभ्यः ॥"

॥गौतम न्याय० १।१।१२॥

"बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥"

॥गौतम न्याय० १।२।१५॥

"युगपज्ज्ञानानुपपत्तिर्मनसो लिङ्गम्।"

॥गौतमन्याय० १।१।१६॥

एतेषाञ्च मूलं यजुर्वेदे दृश्यते। तद्यथा—

आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां
चक्षुर्यज्ञेन कल्पताᳬं श्रोत्रं यज्ञेन कल्पतां
वाग्यज्ञेन कल्पतां मनो यज्ञेन कल्पतामात्मा
यज्ञेन कल्पतां ब्रह्मा यज्ञेन कल्पतां ज्योति-
र्यज्ञेन कल्पताᳬं स्वर्यज्ञेन कल्पतां पृष्ठं
यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्।
स्तोमश्च यजुश्चऽऋक्च साम च बृहच्च
रथन्तरं च। स्वर्देवाऽअगन्मामृताऽअभूम
प्रजापतेः प्रजाऽअभूम वेट् स्वाहा॥

॥ यजु० अ० १८। मं० २९॥

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥

॥ यजु० अ० ३४। मं० १॥

गौतमन्यायदर्शने "प्रमाणप्रमेय" इत्यादिप्रथमसूत्रे षोडशपदार्थज्ञानान्मोक्षा-वाप्तिवर्णनं दृश्यते। तच्च "तदत्यन्तविमोक्षोऽपवर्गः" (गौ० न्याय० १।१।२२)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्यादिसूत्रैः सम्यग् व्याख्यातम्। वेदेष्वपि मोक्षस्वरूपम्बहुलं व्याख्यायते। तद्यथा—

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥

॥ यजु० अ० ३१। मं० १८॥

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवाऽअमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥

॥ यजु० अ० ३२। मं० १०॥

एवं ऋग्वेदिनोऽपि समामनन्ति—

ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश।
तेभ्यो भद्रमङ्गिरसो वो अस्तु प्रतिगृभ्णीत मानवं सुमेधसः ॥

॥ ऋ० १० मण्डले। ६२ सूक्ते। मन्त्रम् १॥

न्यायदर्शने "पृथिव्यप्तेजोवाय्वाकाशमिति भूतानि" (गौ० न्याय० १।१।१३) इति सूत्रेण पञ्चभूतात्मिका मूलप्रकृतिर्वर्णिता, सैव सृष्टेरुपादानकारणम्, ईश्वरश्च निमित्तकारणम्, आत्मकालदिशश्च साधारणकारणानि, एतान्येव सृष्टेर्मूलानि। वेदेषु सृष्टेरुत्पत्तिविषये बहुर्चितम्। तथा हि यजुर्वेदे ऋग्वेदे च समाम्नायते—

अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥

॥ यजु० अ० ३१। मं० १७॥

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

॥ ऋग्०। १० मण्डले १२१ सूक्ते। मं० १॥

को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद ॥

॥ ऋग्० । १० मण्डले । १३० सूक्ते । मं० ६-७ ॥

न्यायदर्शने "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" इति गौतमसूत्रे प्रेत्यभावपदेन पुनर्जन्मविषये बहुर्चर्चितम् । तथा च ऋग्वेदे समाम्नायते---

असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् ।
ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते मृडया नः स्वस्ति ॥
पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम् ।
पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां३ या स्वस्ति ।

॥ ऋग्० । १० मण्डले । ६० सूक्ते । मं० ६-७ ॥

एवमेव यजुर्वेदिनः समामनन्ति---

पुनर्मनः पुनरायुर्मऽआगन् पुनः प्राणः पुनरात्मा मऽआगन्
पुनश्चक्षुः पुनः श्रोत्रं मऽआगन् ।
वैश्वानरो ऽदब्धस्तनूपाऽअग्निर्नः पातु दुरितादवद्यात् ॥

॥ यजु० अ० ४ । मं० १५ ॥

द्वे सृतीऽअशृणवम् पितृणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत् समेति यदन्तरा पितरं मातरं च ॥

॥ यजु० अ० १९ । मं० ४७ ॥

तथा चाऽथर्ववेदिनः शौनकीयाः पठन्ति---

पुनर्मैत्विन्द्रियं पुनरात्मा द्रविणं ब्राह्मणञ्च ।
पुनरग्नयो धिष्ण्या यथास्थाम कल्पन्तामिहैव ॥

॥ अथर्व० कां० ७ । अनु० ६ ६७ सूक्ते । मं० १ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अपानति प्राणति पुरुषो गर्भे अन्तरा ।
यदा त्वं प्राण जिन्वस्यथ स जायते पुनः ॥

॥ अथर्व० कां ११ । अनु० २४ सूक्ते । मं० १४ ॥

अतएव न्यायशास्त्रेतिहासोऽतिप्राचीन इति ज्ञायते । वैदिककाले तर्कस्योपयोगद्वारा यथार्थज्ञानकरणस्य परम्परा आसीत्, वेदवर्णितेष्वात्मसाक्षात्कारोपायेषु तर्कानुकूलमननोपायदर्शनात् ।

उपनिषत्काले अजातशत्रोः, जनकस्य च राजसभायां तत्कालीनैरनेकैस्तार्किकैः तर्कद्वारेणानेकासां समस्यानां समाधानं क्रियतेस्म । उपनिषत्काले वादसाफल्यायानेकेषां तर्कप्रधाननियमानामन्वेषणम् सञ्जातमासीत् ।

भारतीयदर्शनेतिहासे मीमांसका एव प्राचीना नैयायिका आसन् । श्रौताचारस्य विभिन्ननियमेषु प्रतीयमानविरोधपरिहारार्थं तर्कप्रधानदृष्टेरुपयोगः संहिताकाले भवति स्म । श्रौतानुष्ठानविरोधपरिहाराय मीमांसादर्शनेन सर्वप्रथमं तर्कस्योपयोगो विहितः । अत एव "मीमांसा" दर्शनस्यैव "न्याय" शब्देन बोधः बहुकालपर्यन्तं भवति स्म । वेदेषु उपनिषत्सु च स्वीकृता अनेके सिद्धान्ताः न्यायदर्शनेन स्वीकृताः । वृहदारण्यकोपनिषदनुसारेण यदा मनः पुरीतति नाडिकायां स्थितम्भवति तदा सुषुप्तिर्भवति । तद्यथा —

"अथ यदा सुषुप्तो भवति, यदा न कस्यचन वेद, हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात् पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते स यथा कुमारो वा महाराजो वा महाब्राह्मणो वातिघ्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेते ॥"

॥ वृहदारण्यकोपनिषदि २।१।१९॥

न्यायदर्शनेनाऽप्येषः सिद्धान्तोऽङ्गीकृतः । ब्रह्मविषये उपनिषत्सु बहुलं व्याख्यातम् । तथा च मुण्डके—

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥"

॥ मुण्डकोपनिषदि २।२।८ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एवं तैत्तिरीयाः समामनन्ति:—

"सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति ॥

॥ तैत्तिरीयोपनिषदि ।२ अध्याये । अनु० १ ॥

एवम् वैशेषिकदर्शने निरूपितानां षट् पदार्थानां चर्चा उपनिषत्स्वपि दृश्यते। तथा च छान्दोगाः पठन्ति :—

"आकाशो वाव तेजसो भूयान् आकाशे वै सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राण्यग्निराकाशेनाह्वयत्याकाशेन शृणोत्याकाशेन प्रतिशृणोत्याकाशेन रमत आकाशेन रमत आकाशे जायत आकाशमभिजायत आकाशमुपास्स्वेति।"

॥ छान्दोग्योपनिषदि ७।१२।१ ॥

नैयायिकानामप्ययं राद्धान्तः। तद्यथा :—

"गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः अप्तेजोवायूनां पूर्वंपूर्वमपोह्याकाशस्योत्तरः ॥"

॥ गौ० न्या० ३।१।६४ ॥

इति गौतमाचार्यसूत्रे शब्दगुणकमाकाशमिति सम्यग् व्याख्यातम्। अपि च—

"शब्दगुणकमाकाशम्" ॥ तर्कभाषायाम्, तर्कसंग्रहे च ॥

एतैर्विशिष्टैः पुष्टैश्च प्रभूतैः प्रमाणैः न्यायदर्शनस्य प्राचीनत्वं वेदमूलकत्वञ्च सम्यक् प्रसिद्धम्।

भारतीयदर्शनेतिहासे समुपलब्धकालगणनानुसारेण पञ्चदशवैक्रमशतकपूर्वत एवारभ्याद्यावधि न्यायदर्शनस्य विमलधारा परिच्छिन्नरूपेण प्रवहति। प्रारम्भकाले न्यायवैशेषिकौ स्वतन्त्रदर्शनरूपेण प्रादुर्भूतौ। स्वोत्पत्तिकाले न्यायस्य मूलम् पूर्वमीमांसा आसीत्, कालान्तरे स वैशेषिकेण संयुक्तः सम्पन्नः। यथा शब्दानामनित्यत्वं न्यायवैशेषिकाभ्यां समानरूपेण स्वीक्रियते। किन्तु मीमांसकैः शब्दानां नित्यत्वं स्वीक्रियते, तस्मात् न्यायवैशेषिकयोः शब्दानित्यत्वसिद्धान्तः प्रतितन्त्रसिद्धान्त उच्यते। बौद्धकाले न्यायवैशेषिकयोः घनिष्ठः सम्बन्धः सञ्जातः। अतः न्यायसूत्राणामुल्लेखः वैशेषिकदर्शनसूत्रनाम्ना भवति स्म। वसुबन्धुना अस्मिन्नेव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विस्तृतेऽर्थे वैशेषिकशब्दः प्रयुक्तः। शतशास्त्रे आर्यदेवोद्घृतानि न्यायसूत्राण्यपि तस्य टीकाकारेण वैशेषिकसूत्राणीत्यभिहितानि। एकादशशतके शिवादित्यस्य "सप्तपदार्थी" ग्रन्थे द्वयोरपि न्यायवैशेषिकदर्शनयोः समन्वयोऽत्रलोक्यते। तत्र निष्पन्ना समन्वयप्रक्रिया द्विविधा उपलभ्यते। यदि न्यायदर्शनस्य षोडशपदार्थानां वर्णनमभीष्टं भवति स्म तर्हि प्रमेयान्तर्गता एव वैशेषिकस्य षट् पदार्थानां सन्निवेशो विधीयते स्म। वैशेषिकस्य रूपरेखाङ्गीकारदशायां बुद्धिगुणान्तर्गतः न्यायसम्मत-प्रमाणानां सन्निवेशो भवति स्म। कणादसूत्राणि गौतमसूत्रतः प्राचीनानीति श्रीमताम्बलदेवोपाध्यायमहोदयानाम्मतम्। परन्तु तन्न युक्तम्, यतो हि गौतमा-चार्यस्य समयः[१] विक्रमपूर्वचतुर्थशतकम् (विक्रम पूर्व ४ थी श०) कणादस्य च समयः[२] विक्रमपूर्वचतुर्थशतकम् वर्तते। अतो गौतमसूत्राण्येव सर्वप्राचीनानि, कणादसूत्राणि चार्वाचीनानीति मन्तव्यम्।

समुपलब्धकालगणनया अनुमानतः सहस्राब्दीद्वयस्य (दो हजार वर्षों का) न्यायदर्शनस्येतिहासः। तत्र विकासस्य द्विविधः प्रवाहो दृश्यते। तत्र प्रथमः प्रवाहः न्यायसूत्रकारगौतमाचार्यतः प्रारब्धः। गौतमाचार्यस्य न्यायदर्शनसूत्रेषु प्रमाण-प्रमेयादिषोडशपदार्थानां सुविशदं यथार्थं निरूपणं विद्यते। अत एव शास्त्रमिदं "प्राचीनन्यायदर्शनम्" इत्यभिधीयते। द्वितीयप्रवाहस्य प्रवर्तकः गङ्गेशोपाध्याय आसीत्। नव्यन्यायधाराप्रवर्तकस्य गङ्गेशोपाध्यायस्य "तत्त्वचिन्तामणि" ग्रन्थे विशेषतः प्रमाणानां विस्तृतं विवेचनम् वर्तते। अतः शास्त्रमिदं "नव्यन्यायदर्शनम्" इत्युच्यते। प्राचीनन्यायः पदार्थविवेचनपरः, नव्यन्यायश्च प्रमाणविशदीकरणपर इति विज्ञेयम्।

प्राचीननव्यन्याययोर्भेदः स्पष्ट एव प्रतिभाति। उभयोः भाषायाः शैल्याश्च विभिन्नत्वं वर्तते। नव्यन्याये प्रधानतः वैशिष्ट्यसम्बन्धस्य सूक्ष्मं विवेचनं दृश्यते

---

१. गौतमाचार्य का काल विक्रमपूर्व चौथी शताब्दी है। इस विषय में पृष्ठ XXXII पर देखना चाहिए। —टीकाकार

२. कणाद का समय विक्रमपूर्व चौथी शताब्दी है। इस सम्बन्ध में प्रमाण के लिए पृष्ठ XXXIII पर देखना चाहिए। —टीकाकार

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्र प्रकारता-विशेष्यता-अनुयोगिता-प्रतियोगिता-अवच्छेदकता-अवच्छेद्यता-निरूपकता-निरूप्यताप्रभृतीनां शब्दानाम्बहुधा प्रयोगात् नव्यन्यायस्य प्राचीनन्यायात् विभिन्नत्वमवगम्यते। प्राचीननव्यन्याययोर्दार्शनिकदृष्ट्या नव्यन्यायस्य विचारशैली, अभिव्यञ्जनाशैली च गम्भीरा, क्लिष्टा, दुरधिगमा, बहुशब्दजालैरल्पार्थबोधिनीत्यत्र नास्ति विसंवादः। नव्यन्यायेन संस्पृष्टाः सर्वे विषयाः दुर्ज्ञेयाः भवन्ति। प्रमाणमीमांसाकरण एव द्वादशवर्षाणि व्यतीत्याऽपि प्रमेयं न ज्ञातुं शक्नुवन्ति नव्यनैयायिकाः। प्रमाणानि तु साधनानि, न तु साध्यानि। साध्यानि तु प्रमेयाण्येव सन्ति। प्राचीनन्यायशैली तु स्वल्पैः शब्दैर्बह्वर्थबोधिनी, सरला, अन्तरङ्गा, हृत्तलस्पर्शिनी, स्वल्पायासेन विशेषार्थज्ञापिनी आर्षमूला च।

न्यायदर्शनस्य विकासकालः त्रिषु भागेषु विभक्तो भवितुमर्हति—आद्यकालः, मध्यकालः, अन्त्यकालश्च। आद्यकालः प्राचीनन्यायस्य, मध्यकालः साम्प्रदायिकन्यायस्य (प्राचीनन्यायोत्तरशाखायाः) तथा त्रयोदशशकान्तोऽन्त्यकालः नव्यन्यायस्य कालो वर्तते।

न्यायदर्शनाचार्याः

प्राचीनन्यायप्रवर्तका आचार्याः

१. आचार्यः गौतमः—

न्यायसूत्रकारः गौतम एव प्राचीनन्यायस्य प्रवर्तक आचार्य आसीत्। अस्य गोत्रनाम गौतमः गोतमो वा वर्तते, परन्तु तस्य मेधातिथि अक्षपाद इति नामद्वयमपि श्रूयते। तद्यथा महाभारते—

> "मेधातिथिर्महाप्राज्ञो गौतमस्तपसि स्थितः।
> विमृश्य तेन कालेन पत्न्या संस्थाव्यतिक्रमम्॥"
>
> ॥ महाभारते शान्तिपर्वणि २६६ अध्याये। ४५ श्लोकः॥

अपि च न्यायमञ्जर्याम् :—

> "अक्षपादप्रणीतो हि विततो न्यायपादपः।
> सान्द्रामृतरसस्यन्दफलसन्दर्भनिर्भरः।"

(न्यायमञ्जर्याम् १ परिच्छेदे)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यद्यपि गौतमस्य निवासस्थानविषये विद्वत्सु मतभेदो दृश्यते, तथाप्यनेके विद्वांसस्तं मिथिलादेशवासिनं स्वीकुर्वन्ति ।

गौतमीयन्यायसूत्राणां कालविषये विद्वत्सु मतैक्यं नास्ति । सूत्रेषु शून्यवादस्य खण्डनात् डा० याकोबीमतानुसारेण न्यायसूत्राणां कालः विक्रमपूर्वतृतीयशतकम्, पं० हरप्रसादशास्त्रिमतानुसारेण विक्रमपूर्वद्वितीयशतकम्, डा० विद्याभूषणमतेन च विक्रमपूर्वषष्ठशतकमस्ति । न्यायसूत्राणां चतुर्थाध्याये शून्यवादबाह्यार्थभङ्गवाद-प्रभृतीनां बौद्धमतानां खण्डनमुपलभ्यते । आधुनिकानां विदुषां दृष्ट्या एते वादाः बौद्धमतानुसारिणः, परन्तु प्राचीनविदुषाम्मते एते वादाः बुद्धस्य भगवतः पूर्वतनाः आदिसर्गत एव प्रवृत्ताः । जयन्तभट्टस्येदं कथनम्परम्परागतायाः सम्मत्याः प्रतिपादक-मस्ति । फलतो न्यायसूत्राणि एतेषां वादानाम्प्रवर्तकाद् बौद्धदार्शनिकात् नागार्जुनान्नार्वाचीनानि । अतः गौतमाचार्यस्य समयः विक्रमपूर्वचतुर्थशतकमित्येव स्वीकर्तव्यम् ।

गौतमाचार्यस्य न्यायसूत्राणि पञ्चस्वध्यायेषु विभक्तानि, सर्वोऽप्यध्यायः आह्निकद्वये विभक्तः । तत्र प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धान्तावयवतर्कनिर्णय-वादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां षोडशपदार्थानामुद्देशलक्षण-परीक्षाक्रमेण निरूपणं विहितम् । तेषाम्पदार्थानामुपयोगः वादिप्रतिवादिभ्यां सिद्धान्तनिर्णयार्थं विधीयते ।

२. वात्स्यायन :—

प्राचीनन्यायस्याचार्येषु वात्स्यायनस्य प्रमुखं स्थानं वर्तते । एतेन अक्षपाद-गौतमस्य न्यायसूत्राणाम्भाष्यम्प्रणीतम्, यत् न्यायभाष्यनाम्ना वात्स्यायन भाष्यनाम्ना च प्रसिद्धम् ।

न्यायभाष्यकारस्य नामविषयेऽनेकानि मतानि वर्तन्ते । न्यायभाष्यकारः स्वयमेवात्मानं वात्स्यायननाम्ना निर्दिशति । तद्यथा—

"योऽक्षपादमृषिं न्यायः प्रत्यभाद् वदतां वरः ।
तस्य वात्स्यायन इदम्भाष्यजातमवर्तयत् ॥"

॥ वात्स्यायनभाष्ये । ५ अध्याये ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वाचस्पतिमिश्रेण न्यायवार्तिकतात्पर्यटीकायां न्यायभाष्यकारः पक्षिलस्वामि-नाम्नाऽभिहितः। हेमचन्द्रस्य अभिधानचिन्तामणेर्मर्त्यकाण्डे वात्स्यायनस्याष्ट नामान्युक्तानि। तद्यथा —

"वात्स्यायनो मल्लनागः कौटल्यश्चणकात्मजः।
द्रामिलः पक्षिलस्वामी विष्णुगुप्तोऽङ्गुलश्च सः॥"

॥ अभिधानचिन्तामणौ। मर्त्यकाण्डे॥

पुरुषोत्तमदेवस्य त्रिकाण्डशेषकोशे ब्रह्मवर्गेऽधोलिखितं वचनमुपलभ्यते :—

विष्णुगुप्तस्तु कौण्डिन्यश्चाणक्यो द्रामिलोंऽशुकः।
वात्स्यायनो मल्लिनागपक्षिलस्वामिनावपि॥

॥ त्रिकाण्डशेषकोशे। ब्रह्मवर्गे॥

वात्स्यायनस्य निवासस्थानविषये विदुषामनेकानि मतानि वर्तन्ते। मिथिला-निवासी वात्स्यायन इति केषाञ्चिन्मतम्, तत्रैव न्यायसूत्राणां निर्मितत्त्वात्, न्याय-सूत्राध्यापनपरम्परया तद्भाष्यस्याऽपि तत्रैव सम्भावितत्त्वाच्च। केचन तु न्याय-दर्शनस्य द्विचत्वारिंशत्तमसूत्रव्याख्याप्रसंगे मद्रासप्रदेशप्रसिद्धायास्तण्डुलपाकक्रियाया निर्देशात् मद्रासनिवासी वात्स्यायन इति मन्यन्ते।

यद्यपि वात्स्यायनस्य कालविषये निश्चितरूपेण किञ्चित्कथनं त्वशक्यमेव, तथापि न्यायदर्शनस्य प्रथमसूत्रव्याख्याप्रसंगे न्यायभाष्ये उपलभ्यमानः—"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्" इत्यादिश्लोकः चतुर्थवैक्रमशतकस्य प्रथमचरणे स्थितस्य चाणक्यस्यार्थशास्त्रस्य वर्तते। अत्रेदमप्यवधेयम् यत् पूर्वोद्धृत "विष्णुगुप्तस्तु" इत्यादि श्लोकानुसारं चाणक्य एव न्यायभाष्यकर्ता वात्स्यायनः, स एवार्थशास्त्रप्रणेता चेति। एवम् न्यायदर्शनस्य पञ्चमाध्याये द्वितीयाह्निके दशम-सूत्रभाष्ये उपलभ्यमानम् "दश दाडिमानि, षडपूपाः" इति वाक्यम्, द्वितीयशतके विद्यमानस्य पतञ्जलेर्व्याकरणमहाभाष्यस्य वाक्यम्। अतएव पं० बदरीनाथ शुक्ल-महोदयानां मतानुसारेण वात्स्यायनस्य कालः चतुर्थवैक्रमशतकमस्ति। पं० बलदेवो-पाध्यायास्तु वात्स्यायनस्य कालः विक्रमपूर्वप्रथमशतकमिति मन्यन्ते; परन्तु तन्न समीचीनम्, प्रमाणाभावात्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वात्स्यायनेन गौतमप्रणीतेषु न्यायसूत्रेषु विस्तृतं न्यायभाष्यम् प्रणीतम्। न्यायसूत्राणां गूढार्थविबोधनाय न्यायभाष्यातिरिक्तो नाऽस्त्यन्यः कश्चन प्रामाणिको ग्रन्थः। भाष्याध्ययनेन ज्ञायते यद् वात्स्यायनभाष्यात् पूर्वमपि कश्चिद् व्याख्या-ग्रन्थ आसीत्, "त्रिविधमनुमानम्" (न्या. सू. १।१।५) इति सूत्रस्य व्याख्याप्रसङ्गे भाष्यकारेण द्विविधानां व्याख्यानामुल्लेखात्।

३. भारद्वाज उद्योतकर :—

भारद्वाजउद्योतकरः आर्षप्रतिभासम्पन्नो महान् नैयायिक आसीत्। एतेन दिङ्नागस्य कुतर्काणां खण्डनाय वात्स्यायनस्य न्यायभाष्योपरि "न्यायवार्तिकम्" इत्येतदभिधानः सुविख्यातो महान् ग्रन्थः प्रणीतः। तथा च ग्रन्थारम्भे तेन स्वग्रन्थप्रणयनकारणमुक्तम्—

"यदक्षपादः प्रवरो मुनीनां शमाय शास्त्रं जगतो जगाद।
कुतार्किकाज्ञाननिवृत्तिहेतोः करिष्यते तस्य मया निबन्धः॥"

न्यायवार्तिकतात्पर्यटीकायां वाचस्पतिमिश्रेण श्लोकममुं व्याचक्षाणेन न्याय-वार्तिकानां रचनायाः प्रयोजनं सम्यगुपवर्णितम्।

तद्यथा—

"यद्यपि भाष्यकृता कृतव्युत्पादनमेतत्, तथापि दिङ्नागप्रभृतिभिरर्वाचीनैः कुहेतुसन्तमससमुत्थापनेनाच्छादितं शास्त्रं न तत्त्वनिर्णयाय पर्याप्तमित्युद्योतकरेण स्वनिबन्धोद्योतेन तदपनीयते॥"

न्यायवार्तिककारस्य स्थानविषये विद्वत्सु मतैक्यं नास्ति। केचन तस्य "पाशुपताचार्य" इत्युपाधिकारणेन उद्योतकरः काश्मीर निवासीत्याहुः, काश्मीरस्य पाशुपतसम्प्रदायाविर्भावभूमित्वात्। परन्तु केचन तं मैथिलमेव मन्यन्ते; गौतम-वात्स्यायनयोर्मैथिलत्वात्, वार्तिककारपरवर्तिवाचस्पतिमिश्रोदयानाचार्ययोरपि मैथिलत्वाच्च।

न्यायवार्तिककारस्य समयविषये सम्प्रति केवलमिदमेव वक्तुम् शक्यते यद् सः दिङ्नागवसुबन्धुनागार्जुनानाम्बौद्धविदुषाम् परवर्ती आचार्यः, यतो ह्येतेन स्वीयन्यायवार्तिके विदुषामेतेषाम्मतम् खण्डितम्। वसुबन्धोः कालः षष्ठशतकस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मध्यभागोऽस्ति। इदमपि निर्विवादम् यद्वसुबन्धुना वासवदत्तायाम् "न्यायस्थिति-मिवोद्योतकरस्वरूपाम्" इत्यनेन "उद्योतकर" इत्युपाधिनैव न्यायवार्तिककारः स्मृतः। एवम् वसुबन्धोः प्राचीन उद्योतकरः, अतएव उद्योतकर भारद्वाजस्य कालः षष्ठशतकमिति विद्वद्भिर्निश्चीयते।

वसुबन्धुना वासवदत्तायाम् "न्यायस्थितिमिवोद्योतकरस्वरूपाम्" इति विलिख्य न्यायजगति उद्योतकरस्य विमलकीर्तिः सूचिता। दिङ्नागस्य विख्यात-टीकाकारेण धर्मकीर्तिना "प्रत्यक्षं कल्पनापोढम्" इति दिङ्नागीयप्रत्यक्षलक्षणे अभ्रान्तपदं संयोज्य उद्योतकरस्य प्रबलखण्डनाद् दिङ्नागमवरोद्धुम्प्रयत्नो विहितः।

४. वाचस्पति मिश्र :—

सर्वतन्त्रस्वतन्त्रो वाचस्पति मिश्रः षड्दर्शनाम्मान्य आचार्य आसीत्। कालान्तरे मानवशक्तिह्रासात् उद्योतकरकृतस्य "न्यायवार्तिक" नाम्नो ग्रन्थस्य गूढार्थ-बोधानवगमाद् वाचस्पतिमिश्रेण न्यायतात्पर्यटीका प्रणीता। अस्य "न्यायसूची-निबन्ध" नामकग्रन्थस्य रचना अष्टनवत्युत्तराष्टशततमे (८९८) वैक्रमाब्दे जाता। अतो वाचस्पतिमिश्रस्य समयः वैक्रमाष्टशतकान्तो नवमशतकारम्भो वेति स्वीकर्तव्यम्।

मिथिलानिवासी अयमासीदिति जनश्रुतिः। स्वीयालौकिकपाण्डित्यात् "सर्वतन्त्रस्वतन्त्र" इत्युपाधिनाऽयं विभूषितः। वैशेषिकातिरिक्तेषु पञ्चदर्शनेषु वाचस्पतिमिश्रस्य टीकाः प्रौढम्पाण्डित्यं द्योतयन्ति। तात्पर्यटीकया न्यायनयप्रमेयाणां वार्तिकानां च रहस्यबोधे ईदृक् साफल्यमधिगतम्, यदयं "तात्पर्याचार्य" नाम्ना न्यायजगति सुविख्यातो बभूव। अस्य ग्रन्थास्त्विमे:—

(१) न्यायसूची निबन्धः।
(२) भामतीतत्त्वसमीक्षा (वेदान्ते)।
(३) न्यायकणिकाविन्दुर्वा (मीमांसायाम्)।
(४) सांख्यतत्त्वकौमुदी।
(५) तत्त्ववैशारदी।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

५. जयन्तभट्ट :—

जयन्तभट्टः पदवाक्यप्रमाणपारावारीणः वैदिकाऽवैदिकदर्शनेष्वप्रतिहतगति स्वप्रभया दिङ्मण्डलोद्भासकस्य पण्डितश्रीचन्द्रस्य शिवभक्त आत्मज आसीत् विद्वद्भिरयं "नववृत्तिकार" इत्युपाधिना प्रशंसितः, शास्त्रार्थसभासु विजयित्वात् "जयन्त" नाम्ना सुविख्यातश्च । तदुक्तम् स्वयमेवैतेन न्यायमञ्जर्याम्—

"वादेष्वाप्तजयो "जयन्त" इति यो विख्यातकीर्तिः क्षिता-
वन्वर्थो 'नववृत्तिकार' इति यं शंसन्ति नाम्ना बुधाः ।
सूनुर्व्याप्तदिगन्तरस्य यशसा 'चन्द्रस्य' चन्द्रत्विषा
चक्रे चन्द्रकलावचूर्णचरणाध्यायी स धन्यां कृतिम् ॥"

जयन्तभट्टस्य परमोत्कृष्टा कृतिः गौतमाचार्यसूत्राणां "न्यायमञ्जरी" इत्यभि धेया प्रमेयबहुला वृत्तिर्वर्तते । जयन्तभट्टशब्देषु त्वियम् :—

"न्यायौषधिवनेभ्योऽयमावृतः परमो रसः ।
इदमान्वीक्षिकीक्षीरान्नवनीतमिवोद्धृतम् ॥"

न्यायमञ्जर्याम्प्रमाणप्रमेयादिषोडशपदार्थनाम्ना षोडशप्रकरणानि द्वादशाह्निकेष्वन्तर्भुक्तानि । तत्र चार्वाक-बौद्ध-मीमांसा-वेदान्तमतानाम्प्रबलपाण्डित्यपूर्णयुक्तिभिः साहित्यिकभाषया रोचकं खण्डनं विधाय न्यायदर्शनस्य प्रत्यक्षानुमानोपमानशब्दप्रमाणानि प्रतिष्ठापितानि । न्यायमञ्जरी भाषासौष्ठवात्, अर्थगाम्भीर्यात् विषयप्रतिपादनदाक्ष्याच्चाऽनुशीलनीयाऽभ्यसनीया च वर्तते ।

जयन्तभट्टेन न्यायमञ्जर्यामेकचत्वारिंशदुत्तराष्टशततमे (८४१) ईशवी स्थितस्य वाचस्पतिमिश्रस्य मतोल्लेखो विहितः । एकादशशतकीयेन देवसूरि स्याद्वादरत्नाकरस्य द्वितीयपरिच्छेदे—

"यदत्र शक्तिसंसिद्धौ मज्जत्युदयनद्विपः ।
जयन्त ! हन्त का तत्र गणना त्वयि कीटके ॥"

इत्यभिधाय जयन्तस्य असूयापूर्णं उल्लेखो विहितः । अतो जयन्तस्य का ८४१ ईशवीयतः एकादशशतकपूर्वं एवेति । कादम्बरीकथासारे जयन्त सुतेनाभिनन्देन राज्ञः मुक्तापीडस्य अमात्यस्य शक्तिस्वामिनः प्रपौत्रो जय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domaiṇ. Digitized by Sarayu Trust/eGangotri

इत्युक्तम् । काश्मीरनरेशस्य मुक्तापीडस्य समयः अष्टमशतकमध्यभागः । शक्तिस्वामिजयन्तयोर्मध्ये सार्द्धैकशतवर्षाणां (१५०) आनन्तर्यस्वीकारे नवमशतकमेव जयन्तभट्टस्य कालः स्वीकर्तव्यः । तत्र पण्डितबदरीनाथशुक्लमहोदयानामिदम्मतम् यत् जयन्तभट्टस्य कालः दशमशतकस्य प्रथमचतुर्थांश इति न समीचीनम्, अनुगमकाभावात् । नवमोत्तरार्द्धं इति पं० बलदेवोपाध्यायानाम्मतमपि न समीचीनम्, प्रमाणाभावात् ।

६. भासर्वज्ञ :—

भासर्वज्ञः काश्मीरनिवासी आसीदिति विदुषाम्मतम् । अस्य कालविषये बहूनामैतिह्यविदामिदम्मतम् यत् चतुर्दशशतकान्ते स्थितस्य जैनविदुषः गुणरत्नस्य षड्दर्शनवृत्तौ, चतुर्दशशतकद्वितीयचरणे स्थितस्य मलधारिणो राजशेखरस्य षड्दर्शनसमुच्चये च भासर्वज्ञस्य नाम उपलभ्यते । दशमशतककाले विद्यमानस्य बौद्धविदुषः रत्नकीर्तेः 'अपोहसिद्धौ' भासर्वज्ञकृतन्यायसारग्रन्थस्य प्रसिद्धायाः न्यायभूषणटीकाया उल्लेख उपलभ्यते । अतः भासर्वज्ञस्य कालः दशम शतक इति वक्तुं शक्यते । तत्र पं० ज्वालाप्रसादगौड़पण्डितबलदेवोपाध्याययोर्मतम् "भासर्वज्ञस्य कालः नवमशतकान्त" इति न समीचीनम् प्रमाणाभावात् ।

अस्य श्रेष्ठः प्रकरणग्रन्थो 'न्यायसारः' वर्तते । तत्रानेनान्यप्रमेयाम्बद्धन्यायसम्प्रदायविषयम्परित्यज्य प्रत्यक्षानुमानोपमानशब्दप्रमाणान्येव स्वीकृतानि । विशुद्धं प्रमाणवादमाश्रित्यानेन तस्यैव निरूपणम् विहितम् । एतेनात्मनः निरतिशयित्वंस्वीकृत्यानन्दोपलब्धिस्वरूपा मुक्तिरङ्गीकृता । एवम् तस्य "न्यायसार" ग्रन्थोऽतीवादरणीय उपादेयश्च ।

७. उदयनाचार्यः—

न्यायशास्त्रधाराप्रवर्तकेषु वाचस्पतिमिश्रानन्तरमुदयनाचार्यस्य विशिष्टं स्थानम् वर्तते । उदयनाचार्यस्य कालः दशमशतकोत्तरार्द्धं इति पं० बलदेवोपाध्यायमतम् । तन्न युक्तम्, प्रमाणाभावात् । लक्षणावली ग्रन्थोऽनेन ९८४ वैक्रमाब्दे प्रणीतः । अत एवास्य कालो वैक्रमदशमशतकमित्येव स्वीकर्तव्यः । अनेन प्रणीताः ग्रन्थास्त्विमे:—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(१) तात्पर्यपरिशुद्धिः (न्यायवार्तिकतात्पर्यस्य टीका)।
(२) किरणावली (वैशेषिकदर्शनस्य प्रशस्तपादभाष्यस्य टीका)।
(३) लक्षणावली।
(४) न्यायकुसुमाञ्जलिः।
(५) आत्मतत्त्वविवेकः।

तत्र न्यायवार्तिकतात्पर्यपरिशुद्धिटीका वाचस्पतिमिश्रस्य तात्पर्यटीकायाः बहुमूल्या व्याख्या वर्तते। अस्य सर्वोत्तमाविमौ ग्रन्थौ स्तः-प्रथमः आत्मतत्त्वविवेकः द्वितीयश्च न्यायकुसुमाञ्जलिग्रन्थः। आत्मतत्त्वविवेक ग्रन्थे क्षणभङ्गवादशून्यवादयोः खण्डनम्, न्यायसम्मतात्मतत्त्वस्य च विस्तृतं निरूपणं विद्यते। न्यायकुसुमाञ्जलिस्तु उदयनाचार्यग्रन्थेषु मुकुटमणिरिव भासते। न्यायकुसुमाञ्जल्यां सांख्यबौद्धमतयोः ईश्वरनिषेधकप्रमाणानां मार्मिकं वैदुष्यपूर्णञ्च खण्डनम् वर्तते। ईश्वरसिद्धिविषये तर्कप्रधानोऽयं ग्रन्थोऽद्यावध्युपलब्धन्यायनिबन्धेष्वद्वितीयः।

८. वरदराजः —

वरदराजः सम्भवतः आन्ध्रप्रदेशनिवासी आसीत्। अनेन "तार्किकरक्षा" इत्यभिधेयः सुप्रशस्तः प्रकरणग्रन्थः प्रणीतः; तत्तात्पर्यावबोधनार्थं तस्य "सारसंग्रह" नाम्नी व्याख्याऽपि प्रणीता। विष्णुस्वामिशिष्येण ज्ञानपूर्णेन तस्य लघुदीपिका नाम्नी मल्लिनाथेन च "निष्कटङ्क" नाम्नी टीका प्रणीता।

ग्रन्थेऽस्मिन् न्यायदर्शनस्य प्रमाणप्रमेयादिषोडशपदार्थानां निरूपणप्रसङ्गे प्रमेयमध्ये आत्माशरीरादिद्वादशपदार्थैः सह द्रव्यगुणादिषट्पदार्थानामन्तर्भावे इष्टेऽप्यक्षपादेनान्यप्रमेयवद् द्रव्यादीनामुद्देशलक्षणपरीक्षाद्वारा निरूपणं कुतो न विहितमिति जिज्ञासायामाह वरदराजः—

"मोक्षे साक्षादनङ्गत्वादक्षपादैर्न लक्षितम्।
तन्त्रान्तरानुसारेण षट्कं द्रव्यादि लक्ष्यते॥"

तार्किकरक्षायां वाचस्पतिमिश्रोदयनाचार्ययोरुल्लेखो वरदराजेनाद्योल्लिखितश्लोके विहितस्तद्यथा—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"आलोच्य दुस्तरगभीरतरान् प्रबन्धान्
वाचस्पतेरुदयनस्य तथा परेषाम् ।
सारो मयाऽत्र समगृह्यत वावदूके
नित्यं कथासु विजिगीषुभिरेष धार्यः ॥"

चतुर्दशशतकीये 'सर्वदर्शनसंग्रहे' वरदराजस्योल्लेखादयं चतुर्दशशतकात् प्राक्तन इति सिध्यति । अत एवैतिह्यतत्त्वविद्भिर्वरदराजस्य समयः द्वादशशतकमिति निर्धार्यते ।

९. केशवमिश्रः—

केशवमिश्रः मिथिलानिवासी विशिष्टो नैयायिकः आसीत् । अस्य समयविषये न किञ्चिज्ज्ञायते । उदयनाचार्याभिमतं व्याख्यानं केशवमिश्रेण तर्कभाषायामुद्धृतम्, आचार्यस्य समयः दशमशतकोऽस्ति । अतोऽयमुदयनाचार्योत्तरवर्ती सिद्धयति । विजयानगरस्य राज्ञो हरिहरस्य शासनकालः १३७७-१४०४ ई० इति स्वीक्रियते, तदाश्रितेन पं० चिन्नम्भट्टेन ग्रन्थस्यास्य प्रथमटीका विहिता । अत एव साधकबाधकयुक्तिभिर्विचारणायामस्य समयः पञ्चसप्तत्यधिकद्वादशशततम ईशवीयो निर्धार्यते विद्वद्भिः ।

केशवमिश्रेण "तर्कभाषा" इत्यभिधेयः प्रकरणग्रन्थः प्रणीतः । यो बालानां न्यायदर्शने प्रवेशाय सरलं सोपानं वर्तते । ग्रन्थेऽस्मिन् न्यायदर्शनोक्तचतुर्विधप्रमाणानां, द्वादशविधप्रमेयानां, वैशेषिकपदार्थानाम्प्रमात्त्वस्वतःपरतोग्राह्यत्वविशेषणविशेष्यभावानुमानप्रामाण्यदेहात्मवादनिरासजातिज्ञानपदार्थस्थितिविषये बौद्धमतप्रदर्शनद्रव्योत्पत्तिविनाशक्रमशब्दानित्यत्वहेत्वाभासमोक्षनिग्रहस्थानादीनां सम्यग् विशदं विवेचनमस्ति । प्राचीनन्यायपद्धत्या लिखितोऽयं ग्रन्थः त्रिषयप्रवेशदृष्ट्या उपादेय इत्यत्र नास्ति संशयलेशोऽपि । केशवमिश्रो-नव्यनैयायिक इत्येके । तन्न युक्तम्, तस्य ग्रन्थेषु नव्यपद्धतेरभावात् ।

नव्यन्यायप्रवर्तकाः आचार्याः

गङ्गेशोपाध्याय :—

उदयनाचार्यानन्तरं मिथिलायां नव्यन्यायप्रवर्तको नैयायिकः गङ्गेशोपाध्यायो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जन्म लेभे। गङ्गेशोपाध्यायेन खण्डनखण्डखाद्यकारस्य श्रीहर्षस्य (द्वादशशतकान्त भागीयस्य) उल्लेखं विधाय तत्सिद्धान्ताः खण्डिताः। त्रयोदशशतकान्तभागीये पक्षधरमिश्रेण गंगेशोपाध्यायस्य "तत्त्वचिन्तामणि" ग्रन्थस्य आलोकनाम्नी टीका विहिता। अत एवाऽस्य कालः हर्षजयदेवयोर्मध्यकालः अर्थात् त्रयोदशशत-कारम्भ इत्येव स्वीकर्तव्यः। तत्र द्वादशशतकान्तीयो गंगेश इति श्रीपण्डितवदरी-नाथशुक्लमतं न समीचीनम्, प्रमाणाभावात्।

गङ्गेशोपाध्यायेन प्राचीनम्, पदार्थविज्ञानप्रधानं न्यायशास्त्रम् नव्यपद्धत्या प्रमाणप्रधानन्यायशास्त्ररूपे परिवर्तितम्। तस्य तत्त्वचिन्तामणिः नव्यन्यायेतिहासे नवयुगस्य प्रवर्तकः। तत्त्वचिन्तामणेर्भाषा स्वीयविशिष्टतायै सुविख्याता। तत्र गंगेशेन अवच्छेद्य-अवच्छेदक-निरूप्य-निरूपक-अनुयोगि-प्रतियोगिप्रभृतीनां विचार-मापकशब्दानाम्बाहुल्येन प्रयोगो विहितः। तत्त्वचिन्तामणिविषये गङ्गेशोपाध्यायस्येदं वचनं सर्वथा सत्यमेव :—

"यतो मणेः पण्डितमण्डनक्रिया प्रचण्डपाखण्डतमस्तिरस्क्रिया।
विपक्षपक्षे न विचारचातुरी न च स्वसिद्धान्तवचो दरिद्रता॥"

—तत्त्वचिन्तामणिः। प्रत्यक्षखण्डे। मंगलवादः॥

तत्त्वचिन्तामणेरनेकाः टीकाः जाताः। तत्र रघुनाथ शिरोमणेः 'दीधितिः' पक्षधरमिश्रस्य 'आलोकः' मथुरानाथतर्कवागीशस्य च "रहस्यम्" इत्याख्याः टीकाः अतिप्रसिद्धाः।

(२) पक्षधर मिश्र :—

पक्षधरमिश्रः मिथिलाप्रदेशीय उद्भटनैयायिक आसीत्। अस्य 'जयदेव' इत्यपि नाम आसीत्। अनेन गङ्गेशोपाध्यायस्य 'तत्त्वचिन्तामणि'-ग्रन्थस्य 'आलोक' नाम्नी विशिष्टा टीका कृता। अयमुत्कृष्टो नव्यनैयायिकः नाटककारोऽप्यासीत्। अस्यकालः त्रयोदशशतकोत्तरार्द्धं इति ऐतिह्यविद्भिर्निर्णीयते। अनेन प्रणीता ग्रन्थास्त्विमे :—

(१) आलोकः (तत्त्वचिन्तामणेष्टीका)
(२) प्रसन्नराघवम् (नाटकम्)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi .

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(३) द्रव्यपदार्थः ।
(४) लीलावतीविवेकः ।
(५) चन्द्रालोकः ।

(३) वासुदेवसार्वभौम :—

वङ्गवसुन्धरायाः विद्वच्छिरोमणिः वासुदेवसार्वभौमः पक्षधरमिश्रात् विधिवत् तत्त्वचिन्तमणिमधीतवान् । मैथिलाः नव्यनैयायिकाः स्वदेशस्य निधिस्वरूपायाः न्यायविद्यायाः प्रचारं स्वदेशाद् वहिर्नानुमन्यन्ते स्मेति जनप्रवादः श्रूयते । वासुदेवसार्वभौमः तथ्यमिदं जानाति स्म । अतोऽनेन छात्रजीवने सम्पूर्णमपि तत्त्वचिन्तामणिं न्यायकुसुमाञ्जलिञ्च अक्षरशः कण्ठीकृत्य काश्यामागत्य ग्रन्थद्वयं लिपिबद्धं चकार । एवम् वासुदेवसार्वभौमेन नव्यन्यायशास्त्रम् मिथिलामञ्जूषातः वङ्गदेशीयनवद्वीपस्थले नव्यन्यायशास्त्राध्ययनाय विद्यापीठम् स्थापितम् ।

अस्य कालविषये विद्वत्सु वैमत्यम् । तत्र १५५० ईशवीयः वासुदेवस्य काल इति विश्वेश्वराचार्यमतम् । चतुर्दशशतकारम्भ इति पण्डितबलदेवोपाध्यायमतम् । अतो वासुदेवस्य कालः षोडशशतकोत्तरार्द्धं एव स्वीकर्तव्यः, षोडशशतके नवद्वीपे नव्यन्यायस्य वाहुल्येन प्रचारप्रसारदर्शनात् ।

(४) रघुनाथशिरोमणि :—

तार्किकशिरोमणिः रघुनाथो नवद्वीपस्य नैयायिक आसीत् । अस्य कालः षोडशशतक इति विदुषाम्मतम् । बङ्गीयनैयायिकेषु रघुनाथसदृशो न कोऽपि धुरन्धरः तार्किको बभूव । अस्य तर्कविषयकाद्वितीयपाण्डित्यादेव नदियाविद्वत्समाजेनायं 'शिरोमणि' इत्युपाधिना विभूषितः । अस्य सर्वोत्तमा कृतिः गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणेः 'दीधिति' इत्यभिधेया विवरणात्मिका टीका वर्तते । कालान्तरेऽयं टीकाग्रन्थो मूलग्रन्थ इव पाण्डित्यस्य निकषग्रावा सम्पन्नः । 'दीधिति' टीकायां वासुदेवसार्वभौम-पक्षधरमिश्रयोः तत्पूर्ववर्तिनामनेकेषां नैयायिकानाञ्च सिद्धान्तानां खण्डनं वर्तते । ग्रन्थरत्नमिदं ग्रन्थकारस्य मौलिकविचाराणां रमणीयकल्पनानामतिप्रकृष्टयुक्तीनाञ्च भाण्डागारोऽस्ति ।

रघुनाथस्य ग्रन्थेऽनेन श्लोकेनाऽस्य चिन्तनशीलतायाः बौद्धिकक्षमतायाश्च परिचयः समुपलभ्यते :—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"विदुषां निवहैरिहैकमत्याद् यददुष्टं निरटङ्कि यच्च दुष्टम् ।
मयि जल्पति कल्पनाधिनाथे रघुनाथे मनुतां तदन्यथैव ॥'

(५) मथुरानाथतर्कवागीश :—

मथुरानाथतर्कवागीशः रघुनाथशिरोमणेः शिष्यः नवद्वीपस्य श्रेष्ठो नैयायिक आसीत् । अस्य कालः षोडशशतकमित्यनुमीयते विद्वद्भिः । एतेन आलोकचिन्तामणि-दीधितिप्रभृतीनां महत्त्वपूर्णानां ग्रन्थानां गूढार्थप्रकाशिनी 'रहस्यम्' इत्यभिधा टीका प्रणीता । इयं नव्यन्यायविद्वत्समाजेऽतीव समादृता । स्वीयासाधारणवैदुष्या-देवाऽयं 'तर्कवागीश' इत्युपाधिना समलङ्कृतः ।

(६) जगदीश तर्कालङ्कार :—

मथुरानाथानन्तरं नवद्वीपस्य सर्वोच्चः सर्वोत्तमश्च नैयायिकः जगदीश-तर्कालङ्कारः सम्बभूव । अस्य कालः १६३० ईशवीय इति विदुषाम्मतम् । एतेन रघुनाथस्य दीधितेः "जागदीशी" नाम्नी सुप्रसिद्धा विस्तृता प्रामाणिकी च टीका विहिता । अनेन प्रणीताः ग्रन्थास्त्विमे :—

१. तत्त्वचिन्तामणिदीधितिप्रकाशिका (जागदीशी) ।
२. तत्त्वचिन्तामणिमयूखः ।
३. न्यायादर्शः न्यायसारावली वा ।
४. शब्दशक्तिप्रकाशिका ।
५. तर्कामृतम् ।
६. पदार्थतत्त्वनिर्णयः ।
७. न्यायलीलावतीदीधितिव्याख्या ।

विद्वद्भिरस्य 'शब्दशक्तिप्रकाशिका' ग्रन्थो विशेषरूपेण प्रशंसितः । तथोक्तम् केनचिदभियुक्तेन :—

" जगदीशस्य सर्वस्वं शब्दशक्तिप्रकाशिका"

(७) गदाधर भट्टाचार्य :—

गदाधर भट्टाचार्यः नवद्वीपस्य स्वनामधन्यो नैयायिक आसीत् । अस्य कालः सप्तदशशतकारम्भ इति विद्वद्भिर्निर्णीयते । अस्य सर्वोत्तमा कृतिः तत्त्वचिन्तामणि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दीधितेः 'गादाधरी' त्यभिधेया टीका वर्तते । एतेन प्रणीताः ग्रन्थास्त्विमे:—

१. तत्त्वचिन्तामणिदीधितिप्रकाशिका (गादाधारी) ।
२. तत्त्वचिन्तामणिदीधितिव्याख्या ।
३. तत्त्वचिन्तामणेरालोकटीका ।
४. मुक्तावलीटीका ।
५. रत्नकोषवादरहस्यम् ।
६. अनुमानचिन्तामणिदीधितिटीका ।
७. आख्यातवादः ।
८. कारकवादः ।
९. नञ्वादः ।
१०. प्रामाण्यवाददीधितिटीका ।
११. शब्दप्रामाण्यवादरहस्यम्
१२. बुद्धिवादः ।
१३. युक्तिवादः ।
१४. विधिवादः ।
१५. विषयतावादः ।
१६. व्युत्पत्तिवादः ।
१७. शक्तिवादः ।
१८. स्मृतिसंस्कारवादः ।

एतेषु व्युत्पत्तिवादशक्तिवादयोः स्थानं विद्वत्समाजे श्रेष्ठं वर्तते ।

८. वल्लभाचार्यः—

वल्लभाचार्यः न्यायवैशेषिकदर्शनयोः प्रकाण्डपण्डित आसीत् । नायं वैष्णव-सम्प्रदायस्य अपित्वयं वल्लभशाखाप्रवर्तको वल्लभाचार्य इत्यवधेयम् । अस्य "न्यायलीलावती" त्यभिधेयः कमनीयः न्यायवैशेषिकयोर्विशालः प्रकरणग्रन्थो वर्तते । वल्लभाचार्येण स्वप्रियायाः नाम्नि स्वग्रन्थस्य नामकरणं विहितम् । एकेन श्लिष्टपद्येन वल्लभाचार्येण पत्नीरूपायाः स्वग्रन्थरूपायाश्च लीलावत्याः रोचकं वर्णनङ्कुर्वता प्रतिपाद्यानां द्रव्यादिपदार्थानामुल्लेखो विहितः । तद्यथा—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"द्रव्यं नाधिकमुज्ज्वलो गुणगणः कर्माधिकं श्लाघ्यते
जातिर्विप्लुतिमागता न च पुनः श्लाघ्या विशेषस्थितिः ।
सम्बन्धः सहजो गुणाविभिरियं यत्रास्तु सत्प्रीतये
साऽन्वीक्षानयवेश्मकर्मकुशला श्रीन्यायलीलावती ।"

अत्र ग्रन्थे द्रव्यादिसप्तपदार्थानां न्यायवैशेषिकमतानुसारं सम्यग् वर्णनमस्ति ।

वल्लभाचार्यस्य समयविषये ऐतिह्यविद्भिरुच्यते यत्-न्यायलीलावत्यां दशम-शतकस्य चतुर्थचरणे वर्तमानस्य उदयनाचार्यस्य निर्देशात् त्रयोदशशतकस्य प्रथम-चरणे वर्तमानस्य वर्धमानोपाध्यायस्य न्यायलीलावत्याः प्रकाशटीकोपलब्धेश्च वल्लभाचार्यस्य समयः द्वादशशतकमेव स्वीकर्तव्यः ।

९. अन्नम्भट्टः—

अन्नम्भट्टस्य समयः सप्तदशशतकस्योत्तरार्द्धं इति मन्यते विद्वद्भिः । अस्य सुप्रसिद्धो ग्रन्थः "तर्कसंग्रहः" विशेषरूपेण लोकप्रियो वर्तते । तार्किकतत्त्वानां सम्यग्ज्ञानार्थं ग्रन्थोऽयं प्रथमः सरलः बोधगम्यश्च वर्तते । अन्नम्भट्टः तैलङ्गब्राह्मण आसीत् । अस्य पितुर्नाम अद्वैताचार्य तिरुमल आसीत् । काशीमागत्य अन्नम्भट्टेन विद्याध्ययनं कृतमिति "काशीगमनमात्रेण नान्नम्भट्टायते द्विजः" इति लोकोक्त्याऽवगम्यते ।

यद्यप्यन्नम्भट्टस्य प्रसिद्धिः तर्कसंग्रहेण 'दीपिका' टीकया च वर्तते परन्तु अन्येषां शास्त्राणामप्यनेन टीकाः प्रणीताः । तद्यथा—

१. राणकोज्जीवनी (न्यायसुधाटीका) ३. अष्टाध्यायीटीका (व्याकरणे) २. ब्रह्मसूत्र व्याख्या (वेदान्तविषये) ४. सिद्धाञ्जना टीका (जयकृतमण्यालोक-ग्रन्थस्य टीका-न्यायविषये) ५. उद्योतना टीका (कैयट प्रदीपव्याख्यानम्)

१०. श्री पं० विश्वनाथपञ्चाननभट्टाचार्यः—

श्री पं० विश्वनाथ पञ्चानन भट्टाचार्यो बङ्गप्रदेशे रघुनाथशिरोमणिप्रभृतीनां विदुषां विद्यागुरोः वासुदेव सार्वभौमस्य भ्रातुः रत्नाकरविद्यावाचस्पतेः पौत्र आसीत् । अस्य पिता श्री पं० काशीनाथ विद्यानिवासभट्टाचार्यो लब्धप्रतिष्ठो दार्शनिक आसीत् । तदुक्तं क्वचित्—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"विद्यानिवाससूनोः कृतिरेषा विश्वनाथस्य।
विदुषामतिसूक्ष्मधियाममत्सराणां मुदे भविता।

श्रीविश्वनाथेन न्यायवैशेषिकविषयकौ द्वौ ग्रन्थौ प्रणीतौः—

१. कारिकावली (भाषापरिच्छेद.)।
२. न्यायसूत्रवृत्तिश्च।

(क) कारिकावली (भाषापरिच्छेदः)—

अस्मिन् ग्रन्थे अष्टषष्ठ्यधिकैकशत (१६८) संख्यापरिमितकारिकाणाम्माध्यमेन न्यायवैशेषिकसिद्धान्तानां सम्यग् विवेचनमस्ति। स्वीयप्रियशिष्यराजीवदयावशंवदः सन्नयं कारिकावल्याः "न्यायसिद्धान्तमुक्तावली" टीकां व्यधात्। तथोक्तम् विश्वनाथेन मुक्तावलीटीकामुखे:—

"निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः।
विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः॥"

—न्यायसिद्धान्मुक्तावल्याम्। प्रत्यक्षखण्डे

अस्य ग्रन्थस्य विषयप्रतिपादनशैली ईदृशी मनोहारिणी वर्तते यत् तर्कसंग्रहानन्तरमयमेव लोकप्रियः प्रकरणग्रन्थो वर्तते। ग्रन्थेऽस्मिन् प्रत्यक्षखण्डम्, अनुमानखण्डम्, उपमानखण्डम्, शब्दखण्डम्, स्मृतिप्रक्रियाप्रभृतयोऽनेके महत्त्वपूर्णाः प्रकरणाः मनोरञ्जकशैल्या न्यायवैशेषिकविषयम्प्रतिपादयन्ति। अस्योपरि बालकृष्णभारद्वाजसुतमहादेवभट्टभारद्वाजेन विहिता, तत्सुतेन दिनकरभट्टेन च पूरिता "दिनकरी" व्याख्याता, पं० रामरुद्रभट्टाचार्यविहिता "रामरुद्री" प्रभृतयः संस्कृतटीकाः, पं० धर्मेन्द्रनाथशास्त्रि-सूर्यनारायणशुक्ल-ज्वालाप्रसादगौड-राजनारायणशुक्लप्रभृतीनां विदुषां हिन्दी भाषाटीकाश्च जाताः।

(ख) न्यायसूत्रवृत्तिः—

ग्रन्थेऽस्मिन् न्यायसूत्राणां सरला व्याख्या "शिरोमणि" व्याख्यानानुसारेण विहिता।

एतदतिरिक्तमनेनाऽधोलिखिताः ग्रन्थाः प्रणीताः—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१. अलङ्कारपरिष्कारः।
२. नञ्वादटीका।
३. सुबर्थतत्त्वालोकः, कारकचक्रम्वा।
४. पदार्थतत्त्वालोकः।
५. न्यायतन्त्रबोधिनी।
६. पिङ्गलप्रकाशिका।

अनेकसाधकबाधकयुक्तिभिर्विचार्य श्रीविश्वनाथपञ्चाननस्य कालः सप्तदशशतकमिति निर्धार्यते विद्वद्भिः।

११. लौगाक्षिभास्करः—

लौगाक्षिभास्करः वाराणसीवास्तव्यः न्यायवैशेषिकमीमांसादर्शनानां विशिष्टो विद्वानासीत्। अस्य कालः सप्तदशशतकमिति विद्वद्भिर्निश्चीयते। अस्य पितुर्नाम मुद्गलः पितृव्यस्य च नाम रुद्र आसीत्। अनेन न्यायवैशेषिकप्रवेशाय "तर्ककौमुदी" नामकः प्रकरणग्रन्थः प्रणीतः।

१२. शशधर :—

शशधरः न्यायवैशेषिकयोः प्रतिष्ठितो विद्वानासीत्। स्वीयालौकिकपाण्डित्यादेवायं "महोपाध्याय" इत्युपाधिना समलंकृत आसीत्। अनेन न्यायदर्शनस्य "न्यायसिद्धान्तप्रदीप" नाम्नाख्यातः प्रकरणग्रन्थः प्रणीतः। तत्र मुख्यतः न्यायवैशेषिकसिद्धान्ताः प्रतिपादिताः सन्ति। ग्रन्थस्यास्य "न्यायसिद्धान्तप्रदीप" टीकां विलिख्य शेषानन्तेनास्य महत्त्वं वर्द्धितम्।

वंशीयपरम्परानुसारेण शशधरमणिधरौ स्वप्रज्ञातीक्ष्णत्वात् प्रतिपक्षिमते भीषणाक्रमणकरणप्रवृत्तेः "सिंहव्याघ्रौ" इत्यभिहितौ, अत एवैतयोर्व्याप्तिलक्षणम् "सिंहव्याघ्रलक्षण" नाम्ना प्रसिद्धमासीत्। गङ्गेशोपाध्यायेन "तत्त्वचिन्तामणि" ग्रन्थस्याऽनुमानखण्डे व्याप्तिप्रकरणे लक्षणान्येतानि दोषग्रस्तान्यभिहितानि। अत एवास्य समयः गंगेशतः प्राक्तनः द्वादशशतकमित्यभिधीयते विद्वद्भिः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१३. माधवाचार्य :—

माधवाचार्यः वेदभाष्यकर्तुः सायणस्य वंशज आसीत्। तथोक्तम्, सर्वदर्शनसंग्रहे—

"श्रीमत्सायणदुग्धाब्धिकौस्तुभेन महौजसा।
क्रियते माधवार्येण सर्वदर्शनसंग्रहः॥"

माधवाचार्येण सर्वदर्शनसंग्रहे सकलवैदिकावैदिकदर्शनसिद्धान्तानाम्पार्थक्येन निरूपणं विहितम्। न्यायवैशेषिकदर्शनयोः अक्षपाददर्शनम्, औलूक्यदर्शनम्, इत्येवंरूपेण, नाम्ना च ग्रन्थेऽस्मिन् सन्निवेशो विहितः। एतेन प्रणीताः ग्रन्थास्त्विमे—

(१) सर्वदर्शनसंग्रहः।
(२) जैमिनीयन्यायमालाविस्तरः।
(३) कथानिर्णयः।
(४) पराशरस्मृतिव्याख्या।

अस्य कालः चतुर्दशशतकस्य द्वितीयचरणमिति विद्वद्भिर्निर्णीयते।

वैशेषिकदर्शनस्य विकासः

"काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इति लोकोक्त्या वैशेषिकदर्शनस्य महत्त्वम्प्रतीयते। कणादो दर्शनस्यास्य प्रवर्तक आसीत्, अत एवेदं दर्शनम् "कणाददर्शनम्" इत्यभिधीयते। "वैशेषिक" नामविषये विद्वत्सु मतवैपरीत्यम् वर्तते। चीनदेशस्य चिरतानाभिधेयदार्शनिकानुसारेण स्वहेइची नामकदार्शनिक-मतेन च कणादसूत्राणां विशेषतः सांख्यदर्शनाद् विशिष्टत्वात् (युक्तियुक्तत्वात्) "वैशेषिक" इति नामकरणं जातम्। परन्तु नैतत् समीचीनमित्याहुर्भारतीया विद्वद्वरेण्याः। भारतीयविदुषाम्मते "विशेष" इत्यभिधेयातिरिक्तपदार्थस्वीकारादेव कणादसूत्राणां "वैशेषिक" संज्ञा जाता। विशेषमधिकृत्य कृतो ग्रन्थ इति वैशेषिकः।

वैशेषिकदर्शनोत्पत्तिः कदा सञ्जातेति चेदुच्यते। बौद्धग्रन्थेषु मिलिन्दप्रश्न-लङ्कावतारसूत्रप्रभृतिषु वैशेषिकदर्शनस्य नाम उपलभ्यते। तत्र ग्रन्थेषु न्याय-सिद्धान्ताः वैशेषिकरूपेण स्मृताः। बौद्धसम्प्रदाये सर्वसम्मत्या सांख्यवैशेषिकयोर्बुद्ध-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्राक्तनत्वमुररीकृतम् । जैनानां "तत्त्वसमीक्षा" सम्भवतः वैशेषिकपदार्थानां कल्पनाश्रिता, अतो वैशेषिकदर्शनस्य जैनबौद्धयोः प्राचीनतरत्वं ज्ञायते ।

बौद्धदार्शनिकेषु वैशेषिकसिद्धान्तस्य प्रधानतः मान्यता आसीत् । अत एव बौद्धग्रन्थेषु वैशेषिकसूत्राणि विशेषत उल्लिखितान्यवलोक्यन्ते । अतो बौद्धेषु वैशेषिकस्यात्यधिकः प्रभावो ज्ञायते ।

वैशेषिकदर्शनस्य आचार्याः

१. कणाद :—

त्रिकाण्डकोशानुसारेण कणादस्य नाम काश्यपोऽप्यासीदिति ज्ञायते । किरणावल्यामुदयनाचार्येणाऽयं कश्यपमुनेः पुत्रोऽभिहितः । अतोऽस्य गोत्रनाम काश्यप आसीदिति मन्तव्यम् । श्रीहर्षेण नैषधीयचरितमहाकाव्ये कणाददर्शनम् "औलूक" मित्युक्तम् । तद्यथा—

"ध्वान्तस्य वामोरुविचारणायां वैशेषिकं चारु मतं मतम्मे ।
औलूकमाहुः खलु दर्शनन्तत् क्षमं तमस्तत्त्वनिरूपणाय ॥"

—नैषधीयचरिते ।२२।३६॥

वायु पुराणे कणादः प्रभासनिवासिनः सोमशर्मणः शिष्यः, शिवस्यावतारश्चाभिहितः । अत एव कणादमुनिः काश्यपगोत्रीयः सोमशर्मणः शिष्य उलूकनामधारी चासीत् । तद्यथा—

तत्रापि मम ते पुत्राः भविष्यन्ति सुधार्मिकाः ।
उलूको वैद्युतश्चैव शर्वको ह्याश्वलायनः ॥
सप्तविंशतितमे प्राप्ते परिवर्ते क्रमागते ।
जातूकर्ण्यो यदा व्यासो भविष्यति तपोधनः ॥
तदाऽप्यहं भविष्यामि सोमशर्मा द्विजोत्तमः ।
प्रभासन्तीर्थमासाद्य योगात्मा लोकविश्रुतः ॥
तत्रापि मम ते पुत्राः भविष्यन्ति तपोधनाः ।
अक्षपादः कणादश्च उलूको वत्स एव च ॥"

—वायुपुराणे २३ अ०।श्लो०।२१३-२१७

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कणान् अत्तीति व्युत्पत्त्या कणाद शब्दो निष्पद्यते। अयं कपोतवृत्तिमाश्रित्य क्षेत्रेषु पतितान् अन्नकणानभ्यवहार्य जीवनं यापयति स्म; अत एवामुं कणाद इत्याहुः प्राचीनाः विद्वांसः। अस्य उलूक संज्ञाविषयेऽप्यैकमत्यं नास्ति। शतशास्त्रस्य चीनीव्याख्यातुश्चित्सानस्य मतानुसारेणाऽयं दिवसे ग्रन्थप्रणयने व्यस्तः रात्रौ उलूकवत् स्वजीविकोपार्जनं करोति स्म। जैनाचार्यराजशेखरानुसारेण भगवान् शङ्करः उलूकरूपं धारयित्वा कणादाय वैशेषिकशास्त्रमुपदिदेश। अतः कणादः "उलूक" नाम्ना प्रसिद्धः, तद्दर्शनञ्च "औलूकदर्शनम्" इति नाम्ना सुविख्यातम्बभूव। केचन तु, कणादस्य पितुर्नाम उलूक आसीत्, अत एवास्य नाम "औलूक" इति मन्यन्ते।

शङ्करमिश्रमतानुसारेण कणादप्रणीतानि वैशेषिकसूत्राणि सप्तत्यधिकत्रिशतानि सन्ति। सूत्राणि दशस्वध्यायेषु विभक्तानि। प्रत्यध्यायमाह्निकद्वयमस्ति। प्रथमाध्यायस्य प्रथमाह्निके द्रव्यगुणकर्मणां लक्षणानि विभागाश्च, द्वितीयाह्निके सामान्यम्, द्वितीयतृतीयाध्याययोर्नव द्रव्याणि, चतुर्थाध्याये परमाणुवादः, अनित्यद्रव्यविभागौ च, पञ्चमाध्याये कर्माणि, षष्ठाध्याये वेदप्रामाण्यविचारानन्तरं धर्माधर्मौ सप्तमाष्टमाध्याययोर्गुणाः, नवमेऽध्याये अभावज्ञाने, दशमेऽध्याये सुखदुःखविभेदाः त्रिविधानि कारणानि च निरूपितानि। वैशेषिकसूत्राणां रचनाकालः विक्रमपूर्वतृतीयशतकमिति निश्चीयते विद्वद्भिः। अतः कणादस्य समयः विक्रमपूर्वतृतीयशतकमिति निर्णीयते।

वैशेषिकदर्शनस्याऽनेकाः टीकाः प्राचीनाचार्यैर्विहिताः, परन्तु तासु कतिचिदेव सम्प्रत्युपलभ्यन्ते। प्राचीनटीकासु भारद्वाजवृत्तेरुल्लेखो यत्रकुत्रचिदुपलभ्यते, परन्तु सम्प्रति न सा सुलभा। गङ्गाधरकविरत्नप्रणीतमपरम् भारद्वाजवृत्तिभाष्यं वर्तते। इदं कस्याश्चिद् भारद्वाजवृत्तेर्भाष्यमिति प्रतीयते, परन्तु केचित् विद्वांसः भाष्यमिदं स्वतन्त्रनिबन्धरूपेण स्वीकुर्वन्ति। वैशेषिकस्य "चन्द्रानन्दवृत्तिं" नाम्नी अपरा वृत्तिर्बड़ौदानगरे प्रकाशिता। यस्याः समयः द्वादशशतकम् त्रयोदशशतकं वेति विद्वद्भिर्निर्णीयते, तत्र वृत्तौ दशमशतकीयोदयनाचार्य-एकादशशतकीयभारतीयदाक्षिणात्यनैयायिकवादीन्द्रमतोल्लेखात्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२. आत्रेय:—

आत्रेय: वैशेषिकसूत्राणाम्भाष्यकार: आसीदित्यैतिह्यविदांमतम् । जैनदार्शनि कैरनेकस्थलेषु आत्रेयभाष्यस्योल्लेखो विहित: । अज्ञातकर्तृकयां वृत्तौ, अन्ये साम्प्रदायिकग्रन्थेषु च आत्रेयभाष्यस्योल्लेख उपलभ्यते । अत: आत्रेयेण वैशेषिक सूत्राणां प्रमेयवहुला व्याख्या प्रणीता या "भाष्यम्" इति रूपेण प्रसिद्धा इति निश्चीयते ।

३. रावण:—

वैशेषिकसूत्राणां रावणभाष्यमेव सर्वप्राचीनमासीदिति, प्राचीनग्रन्थे तदुल्लेखाज्ज्ञायते । भाष्यन्तु सम्प्रति नोपलभ्यते । उदयनाचार्येण किरणावल्या मेकस्य प्राचीनस्य भाष्यस्योल्लेखो विहित:, यत् पद्मनाभमिश्रस्य "किरणावली भास्करा" नुसारेण रावणभाष्यमेवाऽस्ति । ब्रह्मसूत्रशाङ्करभाष्ये (२।२।११ "द्वे द्वयणुके चतुर्णुकमारभेते" इत्युक्त्वा द्वयणुकात् चतुर्णुकनिर्माणस्योल्लेखो विहित: । रत्नप्रभानिर्दिष्टप्रकटार्थविवरणानुसारेणेदम्प्राचीनमतम् रावणभाष्यस्य वेति निश्चितम्भवति । यथा—

"रावणप्रणीते भाष्ये दृश्यते इति चिरन्तनवैशेषिकदृष्ट्येदम् भाष्यमित्याहु:

—रत्नप्रभायाम्

रावणभाष्ये प्रतिपादितमिदम्प्राचीनम्मतम् प्रशस्तपादभाष्यतो भिन्नं वर्तते अनर्घराघवस्य पंचमेऽङ्के विष्कम्भके "वैशेषिककटन्दीपण्डित:" इति रावणोक्ति: रुचिपतिउपाध्यायेन रावणभाष्यस्य नाम "कटन्दी" आसीदित्युक्तम् । क्वचि "कटन्दी" इत्यस्य "कन्दली" इत्यपि पाठ उपलभ्यते । रावण: वैशेषिक पण्डित आसीत्, तस्य भाष्यलेखनप्रसिद्धत्वात् तच्छ्रेय: रामायणप्रतिनायकाय द विद्वद्भि: । मन्ये, नास्तिकमतवर्णनादेव रावणभाष्यम् विलुप्तमिति ।

४. प्रशस्तपाद:—

प्रशस्तपादस्य "पदार्थसंग्रह" वैशेषिकतत्त्वनिरूपक: नितान्तो मौलि ग्रन्थो वर्तते । साधारणरीत्या इदम्भाष्यमित्युच्यते । अस्मिन् ग्रन्थे ग्रन्थकार वैशेषिकसिद्धान्तानामात्मन: स्वतन्त्रा: विचारा: प्रामाणिकरूपेण प्रतिपादिता:

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दर्शनेतिहासे वैशेषिकसूत्रानन्तरं "प्रशस्तपादभाष्यमेव" सर्वमान्यः ग्रन्थोऽस्ति । अस्मिन् विशेषतः परमाणुवादजगदुत्पत्तिप्रलयप्रमाणगुणानां विस्तृतं विवेचनमुपस्थापितम् । वसुबन्धुना प्रशस्तपादस्य सिद्धान्ताः खण्डिताः । वात्स्यायनस्य न्यायभाष्ये प्रशस्तपादसिद्धान्तानामुपयोगो विहितः । अतएव वात्स्यायनवसुबन्ध्वोः प्राक्तनः विक्रमपूर्वद्वितीयशतकमेव प्रशस्तपादभाष्यस्य कालः स्वीकर्तव्यः ।

प्रशस्तपादभाष्यमाधारीकृत्य चन्द्राचार्येण "दशपदार्थीशास्त्रम्" प्रणीतम्, यत्र द्रव्यगुणकर्मसामान्यविशेषसमवायातिरिक्ताः शक्ति-अशक्ति-सामान्यविशेष-अभावाभिधाः चत्वारः पदार्थाः स्वीकृताः ।

वैशेषिकदर्शनसिद्धान्तानां प्रमेयबहुले आकरग्रन्थे कणादोक्तसप्तदशगुणानां स्थाने प्रशस्तपादेन चतुर्विंशतिगुणाः स्वीकृताः । द्व्यणुकत्र्यणुकादीनां वर्णनं कणादसूत्रेषु नास्ति, परन्तु प्रशस्तपादभाष्ये तयोर्वर्णनमस्ति । ईश्वरसत्तास्वीकारश्रेयोऽपि प्रशस्तपादायैव दीयते ।

प्रशस्तपादभाष्यस्यानेकेषां विदुषां टीकाः जाताः, तद्यथा—

१. व्योमशिवाचार्येण प्रशस्तपादभाष्यस्य "व्योमवती" नाम्नी प्राचीना टीका विहिता । उदयनाचार्यस्य किरणावल्यां राजशेखरस्य न्यायकन्दल्याष्टीकायामस्या उल्लेखो दृश्यते ।

२. उदयनाचार्येण भाष्यरहस्योद्घाटनाय विद्वत्तापूर्णा "किरणावली" नाम्नी टीका प्रणीता । माधवकथनानुसारेण तमसः आरोपितनीलरूपवत्त्व-स्वीकृतिरूप-श्रीधरसिद्धान्तस्य नामोल्लेखमन्तरेणोदयनाचार्येण खण्डनं विहितम् । उदयनस्य किरणावलीवाक्यानां न्यायकन्दल्यां श्रीधरेणोद्धृतत्वात् तत्सिद्धान्तानामालोचनात्वाच्च श्रीधरेण सर्वप्रथमं "न्यायकन्दली" प्रणीता, तत उदयनाचार्येण किरणावली प्रणीता । परन्तु श्रीधरेण ग्रन्थस्य पुनः संशोधनावसरे उदयनमतसमीक्षणं विहितमिति ज्ञायते । किरणावल्याष्टीकासु वरदराज-वादीन्द्र-वर्धमानोपाध्याय-पद्मनाभमिश्र-प्रभृतीनां रससार-किरणावलीप्रकाश-किरणावलीभास्करादयः टीकाः सुप्रसिद्धाः, महत्त्वपूर्णाश्च ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

३. श्रीधराचार्यः गौडदेशस्य भूरिसृष्टिग्रामनिवासी वङ्गदेशीय आसीत्। अस्य पितुर्नाम बलदेव आसीत्। अनेन प्रशस्तपादभाष्यस्य "न्यायकन्दली" नाम्नी महत्त्वपूर्णा टीका ९९१ ईशवीये प्रणीता। न्यायकन्दली वैशेषिकस्य प्रामाणिको ग्रन्थो वर्तते। अस्य तमोविषयकसिद्धान्तानामनेकैर्दार्शनिकैः समीक्षा विहिता। न्यायकन्दल्याष्टीकासु पद्मनाभमिश्रस्य "न्यायकन्दलीसारटीका", जैनविदुषः राजशेखरस्य "न्यायकन्दलीपञ्जिकाटीका" च प्रसिद्धा।

४. श्रीवत्सेन "न्यायलीलावती" नाम्नी प्रशस्तपादभाष्यटीका प्रणीता, परन्तु सा सम्प्रति नोपलभ्यते।

५. श्रीवल्लभाचार्येण वैशेषिकसिद्धान्तानाम्भाण्डागारभूतः "न्यायलीलावती" इत्यभिधेयः प्रशस्तपादभाष्यटीकाग्रन्थः प्रणीतः। ग्रन्थोऽयं किरणावलीवत् प्रसिद्धः विभिन्नटीकामण्डितश्च। अस्य ग्रन्थस्य टीकासु वर्धमानस्य "लीलावतीप्रकाशः" पक्षधरमिश्रस्य "न्यायलीलावतीविवेकश्च प्राचीने टीके स्तः।

६. मिथिलानिवासिनः षोडशशतकोत्तरार्धीयस्य वैशेषिकशास्त्रविदुषः पद्मनाभमिश्रस्य प्रद्योतन मिश्र इत्यपि नामासीत्। अनेन प्रशस्तपादभाष्यस्य "सेतु" नाम्नी टीका प्रणीता, परन्तु सा द्रव्यग्रन्थं यावदेवोपलभ्यते।

७ शङ्करमिश्रेण प्रशस्तपादभाष्यस्य "कणादरहस्य" मित्याख्या टीका प्रणीता।

८. जगदीशभट्टाचार्येण प्रशस्तपादभाष्यस्य "सूक्ति" नाम्नी टीका प्रणीता या द्रव्यग्रन्थं यावदेवोपलभ्यते।

९. मल्लिनाथसूरिणा प्रशस्तपादभाष्यस्य "भाष्यनिकष" नाम्नी टीका प्रणीता, परन्तु सम्प्रति सा नोपलभ्यते।

(२) शिवादित्यमिश्रः—

शिवादित्यमिश्रस्य सुप्रसिद्धो ग्रन्थः "सप्तपदार्थी" नाम, यत्र वैशेषिकसिद्धान्तानां न्यायसिद्धान्तैः सह मनोरमः समन्वयो विहितः। श्रीहर्षेण "खण्डनखण्डखाद्ये" प्रमालक्षणं खण्डितम्। तत्र तावत् "तत्त्वानुभूतिः प्रमा" इत्युक्तम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शङ्करमिश्रमतानुसारेण वाक्यमिमं शिवादित्यमिश्रप्रणीतस्य "लक्षणमाला" ग्रन्थस्य वर्तते। अत एव शिवादित्यमिश्रस्य कालः द्वादशशतकात् प्राक्तन इति विद्वद्भिर्निर्णीयते।

कणादेन षडेव पदार्थाः स्वीकृताः, परन्तु शिवादित्येनाऽभावपदार्थोऽपि स्वीकृतः। तेन सप्तपदार्थीग्रन्थे उदयनप्रणीतकिरणावल्याः पर्याप्तमुपयोगङ्कुर्वता जातितमसोर्लक्षणं विहितम्। सप्तपदार्थीग्रन्थातिरिक्तः "लक्षणमाला" इत्यभिधेयः ग्रन्थोऽपि शिवादित्येन प्रणीत आसीत्।

(६) शङ्करमिश्र :—

शङ्करमिश्रस्य समयः पञ्चदशशतकमिति विद्वद्भिर्निर्णीयते। अयं दरभङ्गा-समीपस्थसरिसँवग्रामनिवासी आसीत्। अस्य पिता मीमांसा व्याकरणाद्यनेकशास्त्र-निष्णात अयाचीमिश्र (भवनाथ मिश्र) नाम्ना लब्धप्रतिष्ठो विद्वानासीत्। शङ्करमिश्रस्य मातुर्नाम भवानी आसीत्। अनेन प्रणीताः सुप्रसिद्धा ग्रन्थास्त्विमे :–

१. उपस्कारः- (कणादसूत्राणां टीका)।
२. कणादरहस्यम्- (प्रशस्तपादभाष्यटीका)।
३. आमोदः- (न्यायकुसुमाञ्जलिव्याख्या)।
४. कल्पलता (आत्मतत्त्वविवेकटीका)।
५. आनन्दवर्धन :– (श्रीहर्षप्रणीतखण्डनखण्डखाद्यटीका)।
६. कण्ठाभरणम् :– (न्यायलीलावतीव्याख्या)।
७. मयूरः– (चिन्तामणिटीका)।
८. वादिविनोद :– (वादविषयको मौलिको ग्रन्थः)।
९. भेदरत्नप्रकाश :– (न्यायवैशेषिकस्य द्वैतसिद्धान्तप्रतिपादकः)।

अवधेयम्—केचन अन्नम्भट्टविश्वनाथपञ्चाननयोरपि वैशेषिकदर्शनाचार्यत्वं स्वीकुर्वन्ति। परन्त्वेतौ नव्यनैयायिकौ, अत एवास्माभिर्नव्यनैयायिकवर्णनप्रकरणे तयोर्वर्णनं विहितम्। नव्यन्याये वैशेषिकदर्शनस्य प्रभावो जात इति स्पष्टमेव; नव्यन्याये वैशेषिकसिद्धान्तानामङ्गीकरणाद्, वैशेषिकस्य नव्यन्यायतः प्राचीनत्वाच्च।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

को नाम शब्दः

निरन्तरं चङ्क्रमणशीले जगत्यस्मिन् नानाविधरूपरङ्गाकारव्यामिश्रितेन्द्रियाधिष्ठानशरीरधारिषु भूतेषु सकलव्यवहारशिरश्शेखरीभूतशब्दस्यैव सत्स्वपि महत्त्वे सर्वेषां हृदि जागर्त्येवायं प्रश्नः, को नाम शब्दः ? किमस्याधिष्ठानम् ? किमस्य रूपम् ? शब्दश्चेतनः, जडोवा ? शब्दश्शक्तिर्द्रव्यं गुणो वा ? परमाणुरूपः वायुविवर्तोवा ? सममेव बहवः प्रश्नाः पुरतः संस्फुरन्ति ।

तदत्र प्रस्तूयते महता प्रयत्नेन प्राच्याऽर्वाच्यसकलज्ञानविज्ञानार्णवव्यामन्थनेन विद्वन्मूर्धन्यसम्मान्योऽखण्डनीयश्च सर्वतन्त्रसिद्धान्तः । वेदेषु शब्दतत्त्वनिरूपणे बहवो मन्त्रास्समाम्नाताः । एवमेवोपवेदवेदाङ्गोपाङ्गब्राह्मणग्रन्थादिष्वपि शब्दवैशिष्टयबोधकानि बहूनि युक्तिप्रयुक्तिसाधकानि वचनानि प्रदर्शितानि ।

अस्यां शताब्यामाधुनिकविज्ञानविषये निरन्तरं बहुभिरनुसन्धानैः शब्दतत्त्वरहस्यान्याविष्चक्रिरे । तन्मतेन ध्वनिरेव शब्दः । ध्वनिश्च केनचित् कम्पनेन जायते । सर्वाणि कम्पनानि यन्त्राधीनानि । ध्वनिप्रसारश्च केनचिद् माध्यमेन भवति । माध्यमं बिना ध्वनेः श्रवणं न भवति । यदि श्रवणेन्द्रियाणि न स्युश्चेत् ध्वनेः श्रवणं न क्वापि स्यात् । तस्माद् ध्वनिः शक्तिरूपः मन्यतेऽधुनातनैर्वैज्ञानिकैः । श्रवणेन्द्रियम् स्वाभाविकम् कृत्रिमञ्च । कृत्रिमं श्रवणेन्द्रियं विविधयन्त्रकृतम् ।

को नाम ध्वनिरित्याकांक्षायामुच्यते-ध्वनिर्नाम सा भौतिकी ऊर्जा यया समस्तभूतानां श्रवणेन्द्रियाणि कृत्रिमयान्त्रिकश्रवणेन्द्रियाणि च प्रभावितानि भवन्ति । स च ध्वनिः श्रवणेन्द्रियं कथं सञ्चरतीति प्रश्ने द्विधा विचार्यते । किम् ध्वन्युत्पादकात् लघवः लघुतराश्च कणाः निर्गत्य श्रोत्रपटहमभिहत्य ध्वनिमुत्पादयन्ति ? किं वा ध्वन्युत्पादकवस्तूनि कम्पनेन वायौ तरङ्गानुत्पादयन्ति ? ते च तरङ्गाः श्रोत्रपटहमभिहत्य वीचितरङ्गन्यायेन ध्वनिमनुभावयन्ति ? तत्र द्वितीयोऽनुमानः श्रेयस्तरः यान्त्रिकप्रत्यक्षत्वात्, सर्वदोषरहितत्वात्, प्राच्यपौरस्त्यविद्वज्जनस्वीकृतत्वाच्च । प्राच्यास्तु पूर्वत एव वीचितरङ्गन्यायेन ध्वनिश्रवणं स्वीकुर्वन्ति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ध्वनितरङ्गा अनुदैर्घ्यं यान्त्रिकतरङ्गाः भवन्ति । इमे तरङ्गाः घनद्रववायव्येष्व-समानरूपेण सञ्चरन्ति । एतादृशतरङ्ग सञ्चारकाः पदार्थकणाः तरङ्ग-दिशमेव कम्पनं कुर्वन्ति । अनुसन्धानेनैतज्ज्ञायते यत् मनुष्याः सर्वान् ध्वनितरङ्गान् श्रोतुं नार्हन्ति, तरङ्गाणां विविधशक्तिमत्त्वात् । वैज्ञानिकैर्ध्वनितरङ्गाणां त्रिधा विभागः कृतः—श्रव्याऽपश्रव्यपराश्रव्यभेदात् ।

श्रव्यतरङ्गा (Sonic Waves)—ये पदार्थकणाः श्रव्यतरङ्गानुत्पादयन्ति ते तरङ्गदिशमेव कम्पन्ते । २० साइकिल/सेकेण्ड (20 cycles/sec.) मानात् २००० साइकिल/सेकेण्ड (2000 cycles/sec) मानपर्यन्तमेवावृत्तिश्श्रव्यध्वनि-तरङ्गाणां मानवश्रोत्राणि मस्तिष्काणि च प्रभावयितुं शक्नोति ।

अपश्रव्यतरङ्गाः (Infrasonic Waves)—श्रव्यतरङ्गावृत्तेरर्थात् २० साइकिल/सेकेण्ड (20 cycles/sec.) मानाऽऽवृत्ति न्यूनाः तरङ्गाः मानवश्रुतिपथम्प्रभावयितुं न क्षमाः भवन्त्यतिसूक्ष्मत्वात् ।

पराश्रव्यतरंगा (Ultrasonic Waves)—श्रव्यतरङ्गावृत्तितोऽधिका-स्तरङ्गाः अर्थात् २०००० साइकिल/सेकेण्ड (20000 cycles/sec.) मानध्वनितरङ्गाः मानवश्रुतिपथं न प्रभावयितुं समर्थाः, अतिमहत्त्वाद्दीर्घत्वाच्च ।

एतैर्विशिष्टैस्तरङ्गैर्बहुविधानि विचित्राणि कार्याणि साध्यन्ते । यथा पराश्रव्य-तरङ्गैः रासायनिकक्रियायां तीव्रता मन्दता च विधीयते, एतैस्तरङ्गैः वीरुधलतादीनां वृद्धौ सहायता गृह्यते, कौशेयवस्त्रवायुयानमोटरचिमनिकानाञ्च स्वच्छता क्रियते । एतैस्तरङ्गैः किण्वबीजानि, नानाविधजीवाणवः, क्रिमिकीटमत्स्यदर्दुरादयो विनाशयितुं शक्यन्ते । रक्तस्रावरहितशल्यक्रियायामेतेषां तरङ्गाणाम्प्रयोगो भवति । एतैस्तरङ्गैराकाशमण्डले व्याप्तधूलिकणान् दूरीकृत्य वायुयानावतारणाय सहायता गृह्यते ।

अनेके मानवेतरप्राणिनः मानवश्रव्यसीमानमतिक्रामन्ति । उदाहरणार्थम् पराश्रव्यतरङ्गाणामावृत्तेर्ध्वनिमुत्पाद्य श्वानः समाह्वातुं शक्यन्ते । इमं ध्वनिं श्वान एव श्रोतुं शक्नुवन्ति, नेतरे । जतुकाश्च (चमगादड़) ७०००० साइकिल/सेकेण्ड (70000 cycles/sec.) मानपराश्रव्यध्वनितरङ्गाणां साहाय्येन रात्रौ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वच्छन्दमुड्डीयन्ते। अमेरिकादेशे उद्याने वृक्षेभ्यः पक्षिणामुत्पातने पराश्रव्य ध्वनितरङ्गाणां प्रयोगो भवति। समुद्रस्याऽगाधता, आकाशे वायुयानस्योच्चता च तैर्ध्वनितरङ्गैर्ज्ञायते।

परमहर्षस्याऽयं विषयो यत् प्राचीनैर्महर्षिभिः शब्दस्वरूपे तदुत्पत्तिविषये च ये सिद्धान्ताः वर्षसहस्रेभ्यः प्राक् निश्चितास्तेऽद्याऽपि वैज्ञानिकैस्सत्याप्यन्ते। एतदेव ऋषीणां ऋषित्वं यत्ते यथार्थद्रष्टार आप्ताः त्रिकालदर्शिनश्चासन्। कोनाम शब्दः? इत्यत्रोक्तम् पतञ्जलिना—

"प्रतीतपदार्थको[1] लोके ध्वनिः शब्द इत्युच्यते। तद्यथा शब्दं कुरु मा शब्दं कार्षी· शब्दकार्ययं माणवकः, इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः।"

अत्र पतञ्जलिना ध्वनिरेव शब्द इति व्यवस्थापितम्। शब्दोत्पत्तिविषये पाणिनिना वर्णोच्चारणशिक्षायां स्पष्टमुक्तम्—

"आकाशवायु[2] प्रभवः शरीरात् समुच्चरन् वक्त्रमुपैति नादः।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः॥"

अत्र शब्दोत्पत्तौ वायोः कम्पनमेव कारणमुक्तम्।

भर्तृहरेराचार्यस्य मतानुसारेण संसारोऽयं शब्दस्वरूपस्य ब्रह्मणो विवर्तः, विवर्तलक्षणञ्च यथा वेदान्तसारे—

"अतत्त्वतोऽन्यथा प्रथा विवर्त इत्युदाहृत." इति।

अर्थात् अतात्त्विकान्यथाभावो विवर्तः। तादृश एव विवर्तोऽयं संसारः शब्दस्येत्याह हरिः—

"अनादिनिधनं[3] ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥"

---

१. महाभाष्य १।१ आ १। पृ० ७ हरयाणा साहित्य-संस्थान गुरुकुल झज्जर संस्करणम्, १९६२॥

२. पाणिनीयशिक्षासूत्रपाठ।सू० १।शिक्षा सूत्राणि पृष्ठ ११।प्राच्यविद्याप्रतिष्ठान काशी संस्करणम्, सं० २००५ वि०॥

३. वाक्यपदीय, ब्रह्मकाण्ड ।१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अर्थात् यद् अनादिनिधनम्, उत्पत्तिविनाशरहितम्, अत एव नित्यम्, अक्षरम् व्यापकं, शब्दतत्त्वं शब्दस्वरूपं तद् ब्रह्म, यतो जगतः संसारस्य प्रक्रिया—उत्पत्तिस्थितिलयाः अर्थभावेन घटपटाद्यात्मना विवर्तते-अतात्त्विकान्यथाभावापन्नम्भवति। अविनश्वरं व्यापकं ब्रह्मैव अर्थभावेन घटपटाद्यात्मना विवर्तते-अतात्त्विकान्यथाभावापन्नम्भवतीति भावः। संसारोऽयं शब्दस्यैव परिणामश्चेत्याह हरिः—

"शब्दस्य[1] परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत॥"

अर्थात् अयं सर्वोऽपि वाच्यवाचकभेदभिन्नः संसारः शब्दस्य सूक्ष्मस्य वाक्तत्त्वस्य परिणाम इति आम्नायविदः वेदविदो विदुर्जानन्ति, न तु वयं कल्पयामः। अतः प्रथमं सर्गादौ एतद् विश्वं व्यवर्तत-व्यजायत इति भावः यद्यपीयं जिज्ञासा अत्र समुदेति यत् प्रथमश्लोके जगच्छब्दविवर्तरूपतया उक्तम्, अनेन श्लोकेन तु परिणामतयोच्यते। तत्र कथं द्वयोर्वादयोः समन्वयः इत्यत्रोच्यते-यत्, परारूपां वाचमुद्दिश्य विवर्तवादः, पश्यन्त्याख्यां वाचमुद्दिश्य परिणामवादः इति ज्ञाप्यते। भर्तृहरेराचार्यस्य मते शब्दाः नित्याः। तदुक्तम् हरिणाः—

"नित्याः[2] शब्दार्थसम्बन्धाः समाम्नाताः महर्षिभिः।
सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः॥"

अर्थात् अष्टाध्यायीसूत्राणां, वार्तिकसूत्राणां, महाभाष्यस्य च प्रणेतृभिः पाणिनिकात्यायनपतञ्जलिभिः शब्दाः, शब्दार्थाः, शब्दार्थसम्बन्धाश्च नित्याः समाम्नाताः। तत्र अष्टाध्यायीसूत्रकृता पाणिनिना "पृषोदरादीनि यथोपदिष्टम्" (अष्टाध्यायी ६।३।१०९) इत्यादिसूत्रैः वार्तिककृता कात्यायनेन "सिद्धे शब्दार्थसम्बन्धे", "सिद्धन्तु नित्यशब्दत्वात्" इत्यादिवार्तिकैः महाभाष्यकृता पतञ्जलिना "संग्रहे एतत् प्राधान्येन परीक्षितम् नित्यः शब्दः," "नित्येषुशब्देषु

---

१. वाक्यपदीय, ब्रह्मकाण्ड/१२०॥
२. वाक्यपदीय, ब्रह्मकाण्ड/२३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारिभिः" "सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः। एकदेशविकारे हि नित्यत्वं नोपपद्यते," "एक इन्द्रशब्दः क्रतुशते प्रादुर्भूतः सर्वयागेष्वङ्गं भवती" इत्यादिभाष्यैः शब्दानां, शब्दार्थानां, शब्दार्थसम्बन्धानाञ्च नित्यत्वं कण्ठत एवाऽङ्गीकृतम्।

परन्तु केचन दार्शनिकाः शब्दानामनित्यत्वम्मन्यन्ते। शब्दानित्यत्ववादिषु दार्शनिकेष्वपि शब्दोत्पत्तिविषये मतत्रयं वर्तते। अर्थात् शब्दानित्यत्वपक्षे शब्दोत्पत्तिविषये केचन वायोः शब्दत्वम्, केचन अणूनां, केचन च ज्ञानस्य शब्दत्वम्मन्यन्ते। सर्वेषामपि मतानि व्याख्यायता श्रीहरिणा उक्तम्—

वायोः शब्दत्वम्—

"लब्धक्रियः[1] प्रयत्नेन वक्तुरिच्छानुवर्तिना।
स्थानेष्वभिहतो वायुः शब्दत्वम्प्रतिपद्यते॥
तस्य कारणसामर्थ्याद् वेगप्रचयधर्मणः।
सन्निपाताद् विभज्यन्ते सारवत्योऽपि मूर्तयः॥"

अणूनां शब्दत्वम्—

अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः।
छायातपतमःशब्दभावेन परिणामिनः॥
स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः।
अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः॥

ज्ञानस्य शब्दत्वम्—

"अथाऽयमान्तरो ज्ञाता सूक्ष्मे वागात्मनि स्थितः।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते॥
स मनोभावमापद्य तेजसा पाकमागतः।
वायुमाविशति प्राणमथासौ समुदीर्यते॥
अन्तः करणतत्त्वस्य वायुराश्रयतां गतः।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते॥

१. वाक्यपदीय, ब्रह्मकाण्ड/१०८-११४॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विभजन् स्वात्मनो ग्रन्थीन्[1] श्रुतिरूपैः पृथग्विधैः ।
प्राणो वर्णानभिव्यज्य वर्णेष्वेवोपलीयते ॥" इति

अत्रेदं तत्त्वम् । वायोः शब्दत्वमाह—वक्तुरिच्छानुवर्तिना, विवक्षाजन्येन प्रयत्नेन प्रेरितो वायुः ऊर्ध्वमाक्रामन् उरः कण्ठताल्वादिषु स्थानेषु अभिहतः सन् शब्दाकारतया परिणमति । स्वक्रियाकारणस्य प्रयत्नविशेषस्य सामर्थ्यात् वेगरूप-धर्मवतः प्रचयो घनीभावस्तद्धर्मवतश्च तस्य वायोः स्थानेषु सन्निपातात् सारवत्योऽपि-घनीभावेन कठिना अपि मूर्तयः विभज्यन्ते-भिद्यन्ते, पाषाणसन्नियोगेन लोष्टवद् विशीर्यन्ते-इति भावः ।

अणूनां शब्दत्वमाह-अणवः रूपरसगन्धस्पर्शशब्दपरमाणवः सर्वशक्तित्वाद्-नानाजातीयस्वस्वकार्यानुकूलशक्तिकत्वात् छायातपतमः शब्दभावेन परिणामिनः-तत्र नीलरूपपरमाणवः छायातमोरूपतया, शुक्लरूपपरमाणवश्चातपरूपतया, शब्द-परमाणवस्तु स्थूलशब्दरूपतया परिणमन्ति । भेदसंसर्गवृत्तयः-भेदो विभागः संसर्गः संयोगः तौ वृत्तिरेषां परमाणूनाम् । यदाऽदृष्टविशेषान्निमित्तात् संयुज्यन्ते, तदा परिणमन्ते । यदा तु विभज्यन्ते तदा परमाणुरूपतयाऽवतिष्ठन्ते । शब्दाख्याः पर-माणवः स्वशक्त्यावदृष्टसहकृतेन प्रयत्नेन व्यज्यमानायां कार्योन्मुखत्वमापाद्यमानायां प्रयत्नप्रेरितप्राणवायुना समीरिताः संहन्यमानाः वायुप्रेरितान्यभ्राणीव प्रचीयन्ते—इति भावः ।

ज्ञानस्य शब्दत्वमाह—अयं शब्द एव आन्तरो ज्ञाता वृत्तिविशिष्टमन्तः करणं वर्तते । सः सूक्ष्मे वागात्मनि-सूक्ष्मशब्दशक्तिरूपे स्थितः सन् स्वस्य रूपस्य प्रकाश-नाय स्थूलशब्दभावेन विवर्तते—भासितो भवति । अत्रेदं तत्त्वम्–वृत्तिविशिष्टमन्तः करणं ज्ञानरूपमेव । तदेव शब्दाकारतया परिणमति । अत एव शब्दो ज्ञानस्य परिणाम इति स्वीकुर्वन्ति वैयाकरणाः । सैव ज्ञाता अर्थबोधनेच्छया मनोभावम्प्राप्य जाठराग्निरूपेण तेजसा पाकमागतः सन् प्राणवायुमाविशन्ति-अभिहन्ति । अभिघा-तानन्तरमसौ सवृत्तिमनोयुतः प्राण ऊर्ध्वं गमनाय प्रेर्यते । ततोऽन्तः करणतत्त्वस्य मनसः आश्रयतां गतः प्राणवायुः मनोधर्मेण दाहेन ज्ञानरूपशब्देन वा समाविष्टः

१. वाक्यपदीये, ब्रह्मकाण्डे/११५॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेजसैव—जाठराग्निसहकारेणैव विवर्तते—बहिः शब्दरूपो भवति। दाहवशादे प्राणः सवृत्तिकमनोरूपान्तःकरणयुतः स्वात्मनो ग्रन्थीन् कादिवर्णस्वरूपा विभज्य पृथगवस्थाप्य भिन्नैः श्रूयमाणैर्ध्वनिभिः वर्णानभिव्यज्य वर्णेष्वेवोपलीयते इति भावः। तदुक्तम्:—

"आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति सः प्रेरयति मारुतम्।
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः
वर्णान् जनयते॥" इति।

भर्तृहरेराचार्यस्य मतानुसारेण शब्दस्य द्वैधं स्वरूपं दृश्यते। तद्यथा—

"द्वावुपादानशब्देषु[1] शब्दौ शब्दविदो विदुः।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते॥" इति

अर्थात् उपादानशब्देषु वाचकशब्देषु मध्ये व्यङ्ग्यव्यञ्जकरूपौ द्वौ शब्दाविति वैयाकरणानां राद्धान्तः। तत्र—एकः ध्वनिरूपः शब्दः स्फोटरूपाणां शब्दानाम्प्रकाशकः, अपरो व्यङ्ग्यरूपः स्फोटः अर्थबोधनाय प्रयुज्यते। तदुक्तम् तपरसूत्रे भाष्ये—

"ध्वनिः स्फोटश्च[2] शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महांश्च केषाञ्चिदुभयन्तत् स्वभावतः॥"

स्फोटो व्यङ्ग्यः, ध्वनिर्व्यञ्जकः। अयमाशयः—प्राकृतवैकृतभेदेन ध्वनिर्द्विविधः प्राकृतोध्वनिः स्फोटव्यञ्जकः, वैकृतस्तु द्रुतादिवृत्तिभेदजनकः। तदुक्तं हरिणा :—

शब्दस्योर्[3] ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते॥"

---

१. वाक्यपदीये, ब्रह्मकाण्डे/४४॥
२. महाभाष्ये १।१।९ आह्निके। ७० सूत्रे॥
३. वाक्यपदीये, ब्रह्मकाण्डे/७७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वैकृतास्तु ध्वनयः प्राकृतध्वनिभिः शब्दस्याभिव्यक्तेरूर्ध्वं जायमानाः द्रुतादिवृत्तिभेदे कारणानि भवन्ति। तैर्द्रुतमध्यमविलम्बितेति वृत्तिभेदैः स्फोटस्तु न भिद्यते भावः।

कालरहितेऽपि स्फोटे प्राकृतध्वनिगतकालस्य स्फोटे आरोपात् मात्रादिकालः उपाधिभेदेन वृत्तिभेदश्च प्रतीयते। तदुक्तम् हरिणा:—

"स्फोटस्याऽभिन्नकालस्य[1] ध्वनिकालानुपातिनः।
ग्रहणोपाधिभेदेन वृत्तिभेदम्प्रचक्षते॥
स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु।
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते॥"

अत्रेदं तत्त्वम्—चिद्रूपज्ञानस्य अत एव नित्यत्वादभिन्नकालस्याऽपि स्थानकरणाभिघातजन्यस्वाभिव्यञ्जकध्वनिकालानुपातिनः ग्रहणोपाधिभेदेन—ग्रहणं बुद्धिस्तस्य भेदेन, यद्वा गृह्यतेऽभिव्यञ्जनद्वारा प्रतीयते शब्दो येनेति ग्रहणं ध्वनयः, तद्रूपोपाधिभेदेन वस्तुतोऽभिन्नस्याऽपि स्फोटस्य वृत्तिभेदं ह्रस्वत्वादिभेदम्प्रचक्षते शब्दैकत्ववादिन आचार्याः। शब्दानां नित्यत्वपक्षे ह्रस्वदीर्घप्लुतादिषु कालभेद प्रयुक्तेषु ध्वनिधर्मेषु स्थितेषु ह्रस्वत्वादिधर्मप्रयुक्ताद्ध्वनेः स्वभावभेदात् शब्दाभिव्यक्ति निमित्तस्य प्राकृतस्य ध्वनेः कालः स्फोटात्मकशब्दास्येत्युपचर्यते।

आचार्येण भर्तृहरिणा अस्यैव शब्दस्य जगन्मूलकत्त्वमपि स्वीकृतम्। भर्तृहरिमते वाच्यवाचकरूपस्यास्य विश्वस्य निबन्धनी-वाच्यवाचकभावात्मिका वा शक्तिः शब्देष्वेवाश्रिता वर्तते। तदुक्तम् हरिणा—

"शब्देष्वेवाश्रिता[2] शक्तिर्विश्वस्यास्य निबन्धनी।
यन्नेत्रः प्रतिभात्माऽयं भेदरूपः प्रतीयते॥"

भर्तृहरेराचार्यस्य मतानुसारेण स्फोटस्य ककाराद्यनेकवर्णव्यक्तिमाध्यमेनाभिव्यक्तिर्भवति। ते वर्णव्यक्तयः एव कैश्चिदाचार्यैर्ध्वनित्वेनोक्ताः। तदुक्तम् हरिणा—

---

१. वाक्यपदीये, ब्रह्मकाण्डे/७५,७६॥

२. वाक्यपदीये, ब्रह्मकाण्डे/११८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनेकव्यक्त्यभिव्यङ्ग्या[1] जातिः स्फोट इति स्मृता ।
केश्चिद् व्यक्तय एवास्याः ध्वनित्वेन प्रकल्पिताः ॥"

अत्र जातिपदोपादानेन ज्ञायते यत् भर्तृहरिः जातिस्फोटमेव स्वीकरोति । "पदे न वर्णाः विद्यन्ते" इति कारिकया ज्ञायते यत् सोऽखण्डस्फोटं स्वीकरोति । अतः भर्तृहरेराचार्यस्य मते अखण्डवाक्यजातिस्फोट एव स्वीक्रियते, तस्याभिव्यक्तिः ककारादिवर्णव्यक्तिमाध्यमेन भवतीत्यनुसन्धातव्यम् ।

लोके सर्वा इतिकर्तव्यता—"इदमेव कर्तव्यमिति ज्ञानम्" शब्दव्यपाश्रया शब्दाश्रिता एवेत्याह हरिः—

"इति कर्तव्यता लोके[3] सर्वा शब्दव्यपाश्रया ।
यां पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते ॥"

अब कारिकावलीकार तात्पर्य का निरूपण करते हैं—"वक्तुरिच्छेति" ।

वक्ता की इच्छा को "तात्पर्य" कहा गया है ।

इस कारिकांश का व्याख्यान करते हुए मुक्तावलीकार लिखते हैं कि यदि शाब्दबोध के प्रति तात्पर्य को कारण नहीं मानेंगे तो "सैन्धवमानय" इत्यादि स्थलों में कहीं (यात्रा प्रसङ्ग में) सैन्धव पद से घोड़ा और कहीं (भोजन प्रसङ्ग में) सैन्धवपद से नमक अर्थ का जो बोध होता है, वह न हो सकेगा ।

वक्ता के तात्पर्य के निश्चायक प्रकरणादि को शाब्दबोध में कारण नहीं माना जा सकता, क्योंकि प्रकरणादिकों का एक रूप से अनुगम होना कठिन है। प्रकरणादि तात्पर्य के जनक हैं, अतः तात्पर्यज्ञानजनकत्वेन अनुगम कर प्रकरणादि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रतिपाद्यत्वात् ।

इत्थञ्च शुकवाक्येऽपीश्वरीयतात्पर्यज्ञानं कारणम्, विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्यज्ञानम् कारणम् ।

अन्ये तु नानार्थादौ क्वचिदेव तात्पर्यज्ञानं कारणम् । तथा च शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्दबोधः, वेदे त्वनादिमीमांसापरिशोधित तर्कैरर्थावधारणादित्याहुः ॥ ८४ ॥

इति श्री पं० विश्वनाथ-पञ्चानन-भट्टाचार्यप्रणीतायाम् न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डमवसितम् ।

लक्ष्मीः

को शाब्दबोध में कारण मान लिया जाय, यह भी ठीक नहीं, क्योंकि तात्पर्य के ज्ञान को शाब्दबोध के प्रति कारण मानने में लाघव है ।

इस प्रकार वेदस्थलों में भी ईश्वर के तात्पर्य का निश्चय होने के कारण वहाँ तात्पर्यज्ञान के लिए ईश्वर की कल्पना की जाती है, वहाँ अध्यापक (गुरु) के तात्पर्यज्ञान को शाब्दबोध में कारण नहीं माना जा सकता, क्योंकि सृष्टि के प्रारंभ में कोई अध्यापक नहीं था । इसलिए वेद में अर्थ ज्ञान के लिए ईश्वर के तात्पर्यज्ञान को ही कारण मानना उचित है ।

अब प्रश्न हुआ कि प्रलय हैं ही नहीं, तो सृष्टि का प्रारम्भ कैसे ? क्योंकि प्रलय के बाद सृष्टि होती है ।

इस शङ्का का निराकरण करते हुए मुक्तावलीकार लिखते हैं कि प्रलय का आगमों (शास्त्रों) में प्रतिपादन किया गया है । जैसे—"नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्यत्" [अर्थात् एक प्रकाशयुक्त ज्योतिश्चेतन (परमेश्वर) के अतिरिक्त दिन, रात्रि, आकाश, पृथ्वी आदि कुछ नहीं था] 'इसलिए प्रलय नहीं है' आदि बातें समीचीन नहीं कही जा सकतीं ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इसी प्रकार शुक (तोता) के वाक्य से होने वाले शाब्दबोध में भी ईश्वर का ही तात्पर्यज्ञान कारण है। विसंवादी (भ्रमात्मक या गाली देने) आदि शुक-वाक्य के शाब्दबोध में शिक्षयिता पुरुष के तात्पर्यज्ञान को कारण मानना चाहिए।

अन्य विद्वानों का कहना है कि सभी जगह शाब्दबोध में तात्पर्यज्ञान को कारण नहीं मानना चाहिए। जहाँ एक शब्द के नाना अर्थ दृष्टिगोचर हों, वहीं तात्पर्यज्ञान कारण है। अतः शुकवाक्य में तात्पर्यज्ञान के विना ही शाब्दबोध होता है। वेद में तो अनादि मीमांसा सहकृत तर्कों (गौतम, जैमिनि आदि महर्षियों के अबाधित निश्चय सहकृत तर्कों) द्वारा ही अर्थ का निश्चय होता है।

इति श्रीमदाचार्य-अशोकचन्द्रगौड़शास्त्रिप्रणीता न्यायसिद्धान्तमुक्तावल्याः शब्दखण्डस्य "लक्ष्मी" नामाभिधा आर्यभाषाटीका सम्पूर्णा ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ परीक्षाप्रश्नोत्तर लेखन पद्धति

सम्प्रति ग्रन्थान्ते परीक्षार्थिनां सुविधार्थं परीक्षासु सम्भावितानाम्प्रश्नाना-मुत्तरलेखनप्रकारः सविस्तरमुपवर्ण्यते। प्रायो दृश्यते यदनेके छात्राः कृतग्रन्थाभ्यासा अपि परीक्षा भवने गत्वा प्रश्नपत्राणि विलोक्यैव हतप्रभाः, भीताः वा जायन्ते। तत्र कारणम्—प्रश्नपत्राणामनवगमः, प्रश्नोत्तरलेखनपद्धत्यनभिज्ञता च। प्रश्नमव-लोक्य सहसा न भेतव्यम्, मनसि सम्यग् विचारणीयम्। सम्यग्ध्यानावस्थितचेत-साऽध्यवसायेन च प्रश्नोत्तराणि स्वयमेव स्फुरन्ति मस्तिष्के।

प्रश्नपत्रेषु त्रिविधाः प्रश्नाः भवन्ति :—

१—सामान्यछात्रसाध्याः

२—छात्रबुद्धिपरीक्षकाः

३—प्रतिभासम्पन्नछात्रसाध्याश्च

१. सामान्यछात्रसाध्याः प्रश्नाः सामान्यछात्राणां कृते भवन्ति, सर्वेऽपि छात्रास्तेषामुत्तरं दातुमर्हन्ति।

२. छात्रबुद्धिपरीक्षकाः प्रश्नाः छात्रस्य बुद्धेः प्रतिभायाश्च परीक्ष-णार्थम्भवन्ति।

३. प्रतिभासम्पन्नछात्रसाध्याः कठिनाः प्रश्नाः प्रतिभासम्पन्नानां छात्राणां कृते भवन्ति, प्रतिभासम्पन्ना एव छात्राः तेषामुत्तरं दातुमर्हन्ति।

प्रश्नस्योत्तरलेखनात् पूर्वं द्विधा त्रिधा वा प्रश्नाः सम्यगवलोकनीयाः मननी-याश्च। तत इदं द्रष्टव्यम् यत् सर्वेषु प्रश्नेषु कः प्रश्नस्सम्यगवबुध्यते छात्रेणेति, सम्यग् विचार्यैवोत्तरलेखने प्रवर्तितव्यम्।

न्यायसिद्धान्तमुक्तावल्याः शब्दखण्डम् प्रायः दुरूहं कठिनञ्च विपुलमतीना-मपि किमुत स्वल्पमतीनां छात्राणामिति न तिरोहितम् विदुषामध्यापकानाम्। सुकुमारमतीनां छात्राणां ज्ञानविकासाय प्रश्नाः, उत्तराणि चादर्शरूपेण दिङ्मात्र-मिह निर्दिश्यन्ते। अन्ते च छात्राणाम् सौकर्याय विंशतिवर्षाणाम्प्रश्नपत्राण्यपि सङ्कलितानि। सम्यक् तेषामुत्तरलेखनाभ्यासेन दुरूहशब्दप्रमाणविषयज्ञानप्रति-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

छया साकम् परीक्षाप्रश्नोत्तरलेखनपाटवमपि वर्द्धिष्यते छात्राणामिति ।

प्रश्न: १. शाब्दबोधस्य किम् कारणम् ? कीदृक्पदार्थोपस्थितेर्व्यापारत्वम् ? संस्कारानुभवाभ्याम्पदार्थोपस्थितिसम्भवे तत्र पदज्ञानस्य कथं कारणत्वम् ? घटपदेनाकाशस्य कथं न शाब्दबोध: इति विलिख्य, का नाम वृत्तिरिति सम्यग् विवेचनीयम् ।

अथवा

पदज्ञानं तु करणम् द्वारन्तत्र पदार्थधी: ।
शाब्दबोध: फलन्तत्र शक्तिधी: सहकारिणी ॥

ग्रन्थसरणिमधिकृत्य कारिकामिमां व्याख्याय घटपदेनाकाशस्य कथं न शाब्दबोधो भवति ? का नाम वृत्तिरिति सम्यग् विव्रियताम् ।

उत्तरम्—शाब्दबोधम्प्रति पदज्ञानं करणम् । पदनिष्ठशक्तिज्ञानाधीनोपस्थिति: शाब्दबोधे कारणम् । वर्तमानकालिकज्ञानविषयीभूतम् ज्ञायमानं वा पदम् न करणम्, पदाभावेऽपि मौनिश्लोकादौ शाब्दबोधात् ।

पदज्ञानजन्यपदार्थस्मरणम् (पदज्ञानजन्यपदार्थोपस्थितिर्वा) शाब्दबोधे व्यापार: । अतएव पदज्ञानवत: प्रत्यक्षादिना पदार्थोपस्थितावपि न शाब्दबोध: ! वृत्तिज्ञानाधीनोपस्थिते: स्वीकारादेव घटपदात् समवायसम्बन्धेनाऽऽकाशस्मरणे जाते नाऽऽकाशविषयक: शाब्दबोधो भवति ।

शक्तिलक्षणान्यतरसम्बन्धो वृत्ति: । पदज्ञानजन्यपदार्थोपस्थितावेव शक्तिज्ञानस्योपयोग: । शक्तिग्रहाभावे पदज्ञानेऽपि शक्तिलक्षणान्यतरसम्बन्धेन स्मरणानुपपत्ति: । पदज्ञानन्तु "एकसम्बन्धिज्ञानमपरसम्बन्धिनम् स्मारयतीति" सिद्धान्तेनार्थस्मारकम्भवतीति दिक् ॥

प्रश्न २. शक्ते: स्वरूपम्प्रतिपाद्यताम् ।

उत्तरम्—पदेन सह पदार्थस्य सम्बन्ध: शक्ति: । स च सम्बन्ध: "अस्माच्छब्दादयमर्थो बोद्धव्य" इतीश्वरेच्छारूप: । न चाऽऽधुनिके नाम्नि शक्तेरभावात् कथम्बोध इति वाच्यम्, "एकादशेऽहनि पिता नाम कुर्यादिति स्मृत्या "एकादशाह-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कालिक पित्रुच्चारणशब्दजन्यबोधविषयः पित्रादिसङ्केतविषयो भवत्वित्याकारिकाया ईश्वरेच्छायास्तत्रापि सत्त्वात्। आधुनिकसङ्केतिते न शक्तिरिति प्राचीनतार्किक-सम्प्रदायः।

नव्यतार्किकमते ईश्वरेच्छा न शक्तिः, किन्त्विच्छैव शक्तिस्तेनाधुनिकसङ्केतित-स्थलेऽपि न दोषः, तत्रापीच्छायाः सत्त्वात्।

प्रश्न ३. शक्तिग्रहोपायाः के? इति प्रदर्शयता संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः इत्येष ग्रन्थः ससन्दर्भपदकृत्यपुरस्सरं लेख्यः।

उत्तरम्—व्याकरणादितः शक्तिग्रहो भवति। तदुक्तम्—

"शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥"

व्याकरणात् शक्तिग्रहो भवति। यथा धातुप्रकृतिप्रत्ययादीनां शक्तिज्ञानं व्याकरणाद् भवति। क्वचिद् बाधके सति तस्य त्यागो भवति। यथा वैयाकरणै-राख्यातस्य कर्तरि शक्तिः स्वीक्रियते। कर्तृत्वस्य शक्यतावच्छेदकत्वे गौरवात्तत्त्यज्यते। लाघवादाख्यातस्य कृतावेव शक्तिः। न च कृतौ शक्तिस्वीकारे तिङा कर्तुरनभिधानाद् चैत्रः पचतीत्यादौ चैत्रादिपदात् तृतीयापत्तिरिति वाच्यम् कर्तृगतसंख्यानभिधान एव "कर्तृकरणयोस्तृतीया" इत्यनेन तृतीयाविधानात्। प्रकृते चैत्रगतसंख्यायाः अभिहितत्त्वेन न तृतीया। संख्याभिधानयोग्यश्च कर्म-त्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः। चैत्र इव मैत्रो गच्छतीत्यादौ चैत्रे संख्या-न्वयवारणाय कर्मत्वादीत्यस्येतरविशेषणत्त्वेन तात्पर्याविषयत्त्वमर्थः। तण्डुलम्पचती-त्यादौ तण्डुले संख्यान्वयबोधवारणाय प्रथमान्तपदोपस्थाप्य इति। अथवा धात्वर्थातिरिक्ताविशेषणत्त्वम्प्रथमदलार्थः। तेन चैत्र इव मैत्रो गच्छतीत्यादौ न चैत्रे संख्यान्वयः। स्तोकम्पचतीत्यादौ स्तोके संख्यान्वयवारणाय प्रथमान्तपदोपस्थाप्य इति द्वितीयदलम्।

मीमांसकैराख्यातस्य व्यापारे शक्तिः स्वीक्रियते, तन्मतं न युक्तम् गौरवात्। न

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

च कृतौ शक्तिस्वीकारेऽचेतने रथे कृतेर्बाधात् रथो गच्छतीत्यादितः कथम्बोध इति वाच्यम् व्यापार आश्रयत्त्वे वा लक्षणया तदुपपत्तेः। जानातीत्यादावाख्यातस्याश्रयत्त्वे नश्यतीत्यादौ प्रतियोगित्त्वे च निरूढलक्षणा।

उपमानादपि शक्तिग्रहो भवति। यथा-गौरिव गवयः। एवम् कोशादपि शक्तिग्रहो भवति। यथा-नीलादिपदानाम् नीलरूपादौ नीलादिविशिष्टे द्रव्ये च शक्तिः कोशेन व्युत्पादिता। परन्तु लाघवान्नीलादावेव शक्तिः, द्रव्यस्य बोधो लक्षणया। एवमाप्तवाक्यादपि शक्तिग्रहो भवति। यथा—"कोकिलः पिकपदवाच्यः" इत्यादि—वाक्यात् पिकादिपदानां कोकिले शक्तिग्रहः।

व्यवहारादपि शक्तिग्रहो भवति। यथा-प्रयोजकवृद्धेन घटमानयेत्युक्तम् तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतः, तदवधार्य पार्श्वस्थो बालः घटानयनरूपं कार्यं घटमानयेतिशब्दप्रयोज्यमिति निश्चिनोति।

एवम् वाक्यशेषादपि शक्तिग्रहो भवति। यथा—यवमयश्चरुर्भवति इत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणाम्प्रयोगः। कङ्गौ च म्लेच्छानाम्। तत्र हि यदाऽन्या ओषधयो म्लायन्तेऽथैते मोदमानास्तिष्ठन्ति। तदुक्तम् :—

वसन्ते सर्वसस्यानां जायते पत्रशातनम्।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः।"

इति वाक्यशेषाद्दीर्घशूके शक्तिर्निश्चीयते। विवरणादपि शक्तिग्रहो भवति। विवरणञ्च तत्समानार्थकपदान्तरेण तदर्थकथनम्। यथा-घटोऽस्तीत्यस्य कलशोऽस्तीत्येनेन विवरणात् घटपदस्य कलशे शक्तिग्रहः। प्रसिद्धपदस्य सान्निध्यादपि शक्तिग्रहो भवति। यथा—"सहकारतरौ मधुरं पिको रौती" त्यादौ "सहकारतरौ" इति प्रसिद्धपदस्य सान्निध्यात् पिकपदस्य कोकिले शक्तिग्रहः—इति दिक्॥

प्रश्न ४. घटादिपदानां कार्यान्वितघटादौ शक्तिरिति मतं समर्थ्यं प्रत्याख्याय च तेषां घटादिमात्रे शक्तिरिति मतं साध्यताम्।

उत्तरम्—घटादिपदानां कार्यान्वितघटादौ शक्तिः, कार्यताबोधम्प्रति च लिङां सामर्थ्यादिति वदन्ति मीमांसकाः। अत एव भूतले नीलो घटः इत्यादिवाक्यान्न

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शाब्दबोधः, लिङ्गादीनामभावादिति तन्न, प्रथमतः कार्यान्वितघटादौ शक्तिस्वीकारेऽपि लाघवेन पश्चात् ततपरित्यागौचित्यात्। अत एव चैत्र! पुत्रस्ते जातः, कन्या ते गर्भिणी जाता इत्यादौ मुखप्रसादमुखमालिन्याभ्यां सुखदुःखयोरनुभवः। कार्यान्वितघटादौ शक्तिस्वीकारे लिङ्गादिज्ञानाभावेन सुखदुःखानुपपत्तिः तस्मान्न कार्यान्विते शक्तिः। न च तम्पश्येत्यध्याहारात् सुखदुःखयोरुपपत्तिरिति वाच्यम् चैत्र! पुत्रस्ते जातो मृतश्चेत्यादौ पश्येत्यध्याहारासम्भवात्। तस्मात् घटपदस्य घटमात्रे शक्तिरिति निश्चीयते इति दिक्॥

प्रश्न ५. जातौ व्यक्तौ जातिविशिष्टव्यक्तौ वा शक्तिरिति निर्णीयताम्।

उत्तरम्—जातावेव शक्तिर्न व्यक्ताविति स्वीकुर्वन्ति मीमांसकाः। व्यक्तौ शक्तिस्वीकारे शक्तेरानन्त्यापत्तिः, एकस्यां व्यक्तौ शक्तिस्वीकारे व्यक्त्यनन्तरस्य शक्तिं विनापि बोधोदयेन व्यभिचारात्। शक्तिं विना आश्रयहीनायाः जातेर्भानासम्भवात् व्यक्तेरपि भानमिति केचित्, तन्न, शक्तिं विना व्यक्तिभानानुपपत्तेः। लक्षणा तु न, अनुपपत्तिप्रतिसन्धानं विनापि व्यक्तिबोधोदयात्। न च व्यक्तौ शक्तिस्वीकारे शक्तेरानन्त्यापत्तिरिति वाच्यम्, सकलव्यक्तावेकस्या एव शक्तेः स्वीकारात्। न चाननुगमः गोत्वादेरनुगमकत्वात्। किञ्च गौः शक्या इति शक्तिग्रहोदयात् व्यक्तौ शक्तिः। यदि गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणम् शाब्दबोधश्च न स्यात्, समानप्रकारकशक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात्। किञ्च गोत्वे यदि शक्तिस्तदा शक्यतावच्छेदकं गोत्वत्वम्, तच्च गवेतरासमवेतत्वे सति सकलगोसमवेतत्वम्। एवञ्च गोव्यक्तीनाम् शक्यतावच्छेदकेऽनुप्रवेशाद् गौरवम्। तस्मात् तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधोपपत्तये जात्याकृतिविशिष्टव्यक्तौ शक्तिः स्वीकार्या इति दिक्॥

प्रश्न ६. कतिविधानि पदानि? कानि च तानि? इति सोदाहरणं विलिख्य योगरूढशब्दविषये मतभेदम्प्रदर्शयत।

उत्तरम्—शक्तम्पदम्, यौगिक-रूढ-योगरूढ-यौगिकरूढभेदात् चतुर्विधम्। यत्रावयवार्थमात्रस्य बोधस्तद्यौगिकम्। यथा-पाचकः। यत्रावयवशक्तिरहित-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समुदायमात्रेण बोधस्तद् रूढम्। यथा-गोमण्डलादिपदम्। यत्रावयवशक्तिसहित-समुदायशक्त्या बोधस्तद्योगरूढम्। यथा-पङ्कजादिपदम्। पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृरूपमर्थम्बोधयति, समुदायशक्त्या च पद्मत्वेन रूपेण पद्मम्बोधयति। अवयवशक्त्या पङ्कजपदस्य कुमुदेन प्रयोगः, रूढिज्ञानस्य केवलयौगिकार्थज्ञाने प्रतिबन्धकत्वात्। वस्तुतस्तु समुदायशक्त्योपस्थितपद्मे अवयवार्थपङ्कजनिकर्तु-रन्वयो भवति। सान्निध्याद्यत्र रूढ्यर्थस्य बाधस्तत्र लक्षणया कुमुदादेर्बोधः। यत्र कुमुदत्वेन रूपेण बोधे न तात्पर्यज्ञानम्, पद्मत्वस्य च बाधस्तत्रावयवशक्ति-मात्रेण निर्वाहः। यत्र तु स्थलपद्मादवयवार्थबाधस्तत्र समुदायशक्त्या पद्मत्वेन रूपेण बोधः। यदि तु स्थलपङ्कजम् विजातीयमेव तदा तु लक्षणयैवेति। यत्र यौगिकार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधस्तद्यौगिकरूढम् यथोद्भिदादिपदम्। तत्र हि उद्भेदनकर्ता तरुगुल्मादिरवबुध्यते, यागविशेषोऽपीति दिक्॥

प्रश्न ७. लक्षणायाः किम् स्वरूपम्? किञ्च लक्षणाबीजम्? लक्षणावृत्तितो लक्षितलक्षणायां को विशेषः? इति च प्रदर्श्य लाक्षणिकम् पदम् नानुभावकमिति निरस्यताम्।

उत्तरम्—शक्यसम्बन्धो लक्षणा। गङ्गापदस्य शक्यार्थे प्रवाहे घोषस्यान्वया-नुपपत्तिस्तात्पर्यानुपपत्तिर्वा प्रतिसन्धीयते यत्र, तत्र लक्षणया तीरस्य बोधः। तात्पर्यानुपपत्तिरेव लक्षणायाम्बीजम्। अत एव 'यष्टीः प्रवेशय' इत्यत्र यष्टिप्रवेशे भोजनतात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा। अन्वयानुपपत्तेर्लक्षणाबीजत्वे तु "काकेभ्यो दधि रक्ष्यताम्" इत्यादौ अन्वयानुपपत्त्यभावेन लक्षणा न स्यात्। शक्यार्थसम्बन्धे यदि तीरत्वेन रूपेण गृहीतस्तदा तीरत्वेन तीरबोधः। यदा गङ्गातीरत्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणम्। अत एव लक्ष्यतावच्छेदके न लक्षणा। लक्ष्यता-वच्छेदकप्रकारकबोधस्य लक्षणां विनाऽप्युपपत्तेः। एवम् स्वीकारे सति शक्यताव-च्छेदकेऽपि शक्तिर्नस्यात्, शक्यतावच्छेदकप्रकारकशक्यार्थस्मरणम्प्रति तत्पदस्य सामर्थ्यात्। यत्र शक्यार्थस्य परम्परासम्बन्धरूपा लक्षणा सा लक्षितलक्षणा। यथा-द्विरेफपदम्। अत्र रेफद्वयरूपशक्यार्थस्य भ्रमरपदे साक्षात् सम्बन्धः, भ्रमर-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पदस्य भ्रमररूपेऽर्थे सम्बन्धः। लाक्षणिकम्पदम् न शाब्दानुभवजनकम्। लाक्षणिकार्थस्य शाब्दबोधे पदान्तरं कारणम्। वाक्ये शक्तेरभावात् लक्षणा न भवति। यथा "गभीरायां नद्यां घोषः"। तत्र नदीपदस्य नदीतीरे लक्षणा। गभीरपदार्थस्य नद्या सहाभेदान्वयः। न च पदार्थः पदार्थेनान्वेति, इति सिद्धान्तात् नद्या एकदेशत्वेन कथं तत्रान्वय इति वाच्यम्, नदीपदस्यैव गभीरनदीतीरे लक्षणात्त्वात् गभीरपदस्य तात्पर्यग्राहकत्वादिति दिक्।

प्रश्न ८. चित्रगुरित्यस्मात् स्वामिबोधः कथमिति प्रतिपाद्य "राजपुरुषः" इत्यादितत्पुरुषे कुत्र कीदृशी लक्षणेति विलिख्यताम्।

उत्तरम् — चित्रगुरित्यादौ एकदेशान्वयस्वीकारपक्षे गोपदस्य गोस्वामिनि लक्षणा, गवि चित्रस्याऽभेदान्वयः। पदार्थः पदार्थेनेति व्युत्पत्त्या एकदेशान्वयाभावे तु गोपदस्य चित्रगोस्वामिनि लक्षणा, चित्रपदं तात्पर्यग्राहकम्। तत्पुरुषसमासे तु पूर्वपदे लक्षणा। तथा हि-"राजपुरुष" इत्यादौ राजपदार्थेन पुरुषपदार्थस्य न साक्षादन्वयः। किन्तु राजपदस्य राजसम्बन्धिनि लक्षणा, तस्य च पुरुषेण सहाभेदान्वयः, निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात्। अत एव राजा पुरुषः इत्यत्र न भेदान्वयः, इति दिक्।

प्रश्न ९. द्वन्द्वे साहित्ये लक्षणेति मीमांसकमतद्वयम्, कर्मधारये लक्षणात्त्वञ्च निराकृत्य नैयायिकमतेन लक्षणां निरस्यताम्।

उत्तरम्—द्वन्द्वसमासे "धवखदिरौ छिन्धीत्यादौ" न लक्षणा, धवः खदिरश्च विभक्त्यर्थद्वित्वप्रकारेण बोधः, साहित्ये लक्षणा स्वीकर्तुमशक्यत्त्वात् साहित्यशून्ययोः पदयोरपि द्वन्द्वदर्शनात्।

न चैकक्रियान्वयित्वरूपसाहित्यस्य सत्वमिति वाच्यम्, धवखदिरौ पश्य, छिन्धीत्यादौ क्रियाभेदेऽपि साहित्यस्याननुभवाच्च। अत एव राजपुरोहितौ सायुज्यकामौ यजेयाताम् इत्यत्र लक्षणाभावाद् द्वन्द्व आश्रीयते, तस्मात् साहित्यं न द्वन्द्वार्थः, किन्तु वास्तवो भेदो यत्र तत्र द्वन्द्वो भवति। न च नील घटयोरभेद इत्यत्र भेदाभावात् कथं द्वन्द्व इति वाच्यम् नीलपदस्य, नीलत्वे घटपदस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

घटत्वे लक्षणा अभेद इत्यस्याश्रयाभेद इत्यर्थात् अहिनकुलसमाहारे लक्षणा। पूर्वपदं तात्पर्यग्राहकम्। न च अपेक्षाबुद्धिविशेषरूपस्य समाहारस्य वारणासम्भवाद् "भेरीमृदङ्गं वादय" इत्यत्र कथमन्वय इति वाच्यम्, परम्परया सम्बन्धेन तदन्वयात्। नव्यनैयायिकमते अहिर्नकुलश्च बुध्यते इति प्रत्येकमेकत्वान्वयः। "द्वन्द्वश्च प्राणितूर्य" इत्यादिसूत्रेण यत्रैकवद्भावस्तत्रैव समाहारसंज्ञा। "पितरौ" इत्यत्र पितृपदस्य जनकदम्पत्योर्लक्षणा। "श्वशुरौ" इत्यत्र श्वशुरपदस्य स्त्रीजनकदम्पत्योर्लक्षणा। कर्मधारये तु न लक्षणा। नीलोत्पलमित्यादौ नीलपदार्थस्योत्पलपदार्थेऽभेदेनान्वयात्। अत एव निषादस्थपतिं याजयेत् इत्यत्र निषादानां स्थपतिरिति तत्पुरुषे लक्षणापत्तेः, किन्तु कर्मधारय आश्रितः, लक्षणाभावात्। न च सङ्करजातिविशेषस्य निषादस्य वेदानधिकाराद् याजनासम्भव इति वाच्यम्, श्रुत्यन्यथानुपपत्त्या तावन्मात्रवेदाध्ययनस्य कल्पनात्। उपकुम्भमित्यादौ परपदस्य तत्सम्बन्धिनि लक्षणा। एवञ्च समासे न समुदाये शक्तिः, पदशक्त्यैव निर्वाहादिति दिक्॥

प्रश्न १०. आसत्तिस्वरूपम् शाब्दबोधे तस्य कारणत्वञ्च प्रतिपाद्य नैयायिकमतेन स्फोटम्प्रत्याख्यायताम्।

उत्तरम्—अन्वयप्रतियोग्यनुयोगिपदयोरव्यवधानमासत्तिः। आसत्तिज्ञानं शाब्दबोधे कारणम्। वस्तुतस्तु यत्पदार्थेन यत्पदार्थस्यान्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः शाब्दबोधे कारणम्। अत एव गिरिर्भुक्तम्, अग्निमान् देवदत्तेनेत्यत्र न शाब्दबोधः, भुक्तपदव्यवधानात्। नीलो घटो द्रव्यम्पटः इत्यादौ आसत्तिभ्रमाच्छाब्दबोधः। न च यत्र छत्री, कुण्डली, वासस्वी देवदत्त इत्युक्तम्, तत्रोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशादव्यवधानेन तदुत्तरपदस्मरणासम्भव इति वाच्यम्, प्रत्येकपदानुभवजन्यसंस्कारैश्चरमस्य तावत्पदविषयकस्मरणस्याऽव्यवधानेनोत्पत्तेः सम्भवात्। अयमेव खलेकपोतन्यायेन बोधः। तदुक्तम्—

"वृद्धाः युवानः शिशवः कपोताः खले यथामी युगपत् पतन्ति।
तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति॥"

परे तु—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

"यद्यद्वाकांक्षितं योग्यं सन्निधानम्प्रपद्यते।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते॥"

यथा खण्डवाक्यार्थबोधोत्तरम्महावाक्यार्थबोधः, तथा राजपुरप्रवेशन्यायेन बोधः।

स्फोटवादिवैयाकरणमतं खण्ड्यते-एतेन वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तः। तत्तद्वर्णसंस्कारसहितचरमवर्णोपलम्भेन तद्व्यञ्जकेनैवोपपत्तेरिति। शाब्दिकैः घटाद्यर्थोपस्थापकः स्फोट इत्युच्यते। घटपदस्य क्रमिकवर्णचतुष्टयात्मकस्य कदाऽप्यसत्त्वेनार्थोपस्थापकत्वासम्भवात्। स्फोटस्तु ब्रह्मैव, नातिरिक्तपदार्थः, तस्यैकत्वेऽपि तत्तद्वर्णाभिव्यक्तिस्तत्तदर्थोपस्थापिका भवतीति न घटपदोच्चारणदशायां पटाद्युपस्थित्यापत्तिः। पदस्फोटवाक्यस्फोटादि-व्यवहारोऽपि पदजन्याभिव्यक्तिवाक्यजन्याभिव्यक्तिभेदादेव स्वीक्रियते। तत्र पूर्वपूर्ववर्णानुभवजनितचरमवर्णानुभवरूपोद्बोधकोद्बोधितचरमवर्णानुभवजनितसंस्कारेणैव क्रमिकवर्णविशिष्टपदस्मरणस्योपपादितत्त्वादिति दिक्॥

प्रश्न ११. योग्यतायाः स्वरूपम्प्रदर्श्य तज्ज्ञानस्य शाब्दबोधे कारणत्वमस्ति न वेति प्रतिपाद्यताम्।

उत्तरम्—एक पदार्थेऽपरपदार्थ सम्बन्धो योग्यता, तज्ज्ञानं शाब्दबोधे कारणम्। अत एव बह्निना सिञ्चतीत्यादितो न बोधः योग्यताज्ञानाभावात्। ननु योग्यतायाः ज्ञानं शाब्दबोधात् प्राक् सर्वत्र न सम्भवति वाक्यार्थस्यापूर्वत्वात् कथं तज्ज्ञानं शाब्दबोधे कारणम् इति वाच्यम्, तत्तत्पदार्थस्मरणे सति क्वचित् संशयरूपस्य क्वचिन्निश्चयरूपस्य योग्यताज्ञानस्य सम्भवात्। नव्यतार्किकैः योग्यताज्ञानस्य कारणत्वापेक्षया अयोग्यतानिश्चयस्य प्रतिबन्धकत्वमेव युक्तम्। बह्निना सिञ्चतीत्यादौ बह्निकरणत्वाभावरूपायोग्यतानिश्चयस्य सत्वान्न शाब्दबोधः। न चैवम्, पीतः शङ्खः इति वाक्यात् पीतत्वाभाववान् शंखः इत्ययोग्यतानिश्चयसत्त्वेऽपि कथं शाब्दबोध इति वाच्यम्, तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वात् शाब्दबोधम्प्रत्यपि प्रतिबन्धकत्वेना-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दोषादिति दिक् ॥

प्रश्न १२. आकांक्षाज्ञानतात्पर्यज्ञानयोश्च शाब्दबोधे कारणत्वाकारणत्वे मतभेदेनोपपादयता, वेदवाक्ये अध्यापकतात्पर्यज्ञानं कुतो न गृह्यते ? शुकवाक्ये कथं शाब्दबोध इति सम्यक् प्रतिपाद्यताम् ॥

उत्तरम्—येन पदेन विना यत्पदस्यान्वयाननुभावकत्वम्, तेन पदेन सह तस्याकांक्षा । क्रिया पदं विना कारकपदम् नान्वयबोधञ्जनयतीति क्रियापदेन सह कारकस्याकांक्षा । वस्तुतस्तु क्रिया-कारक-पदानां सान्निध्यस्य आसत्त्या चरितार्थत्वाद् घटकर्मताबोधम्प्रति घटपदोत्तरद्वितीयारूपाकांक्षाज्ञानं कारणम् । अत एव घटः कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः । "अयमेति पुत्रो राज्ञः पुरुषोपसार्यताम्" इत्यादौ पुत्रेण सह राजपदस्य तात्पर्यग्रहसत्त्वे तेनैव बोधः पुरुषेण सह तात्पर्यग्रहे तु पुरुषेणैव बोधः ।

इदम्पदम् वाक्यं वा एतदर्थबोधनेच्छया वक्त्रा उच्चारितम्-इत्याकारकं तात्पर्यज्ञानम् । तच्च शाब्दबोधे कारणम् । अत एव सैन्धवमानयेत्यादौ यात्राप्रकरणसमये अश्वस्य, भोजनप्रकरणसमये च लवणस्य बोधः । न च तात्पर्यग्राहकप्रकरणादीनाम् शाब्दबोधे कारणत्वस्वीकारेणैवोपपत्तौ तात्पर्यज्ञानस्य कारणत्वस्वीकारो व्यर्थः, तात्पर्यज्ञानजनकत्वेन प्रकरणादीनामनुगम इति वाच्यम्, ततोऽपि लाघवेन तात्पर्यज्ञानस्यैव कारणत्वात् । वेदवाक्ये तात्पर्यज्ञानार्थमीश्वरः कल्प्यते । नहि तत्राध्यापकतात्पर्यज्ञानं कारणम्, सर्गादावध्यापकाभावात् । न च प्रलय एव नास्ति कुतः सर्गादिरिति वाच्यम्, आगमेषु प्रलयस्य प्रतिपादनात् । एवञ्च शुकवाक्ये ईश्वरीयतात्पर्यज्ञानं कारणम्, विसंवादिशुकवाक्ये शिक्षयितुरेव तात्पर्यज्ञानं कारणम् । अन्यमते नानार्थस्थले क्वचिदेव तात्पर्यज्ञानं कारणम् । शुकवाक्ये तात्पर्यज्ञानं विनैव बोधः । वेदवाक्यादनादिमीमांसापरिशोधिततर्कैरर्थावधारणम्–इति दिक् ॥

॥ इति श्रीमदाचार्यअशोकचन्द्रगौड़शास्त्रिप्रणीता न्यायसिद्धान्तमुक्तावल्याः-शब्दखण्डे परीक्षाप्रश्नोत्तरलेखनपद्धतिः सम्पूर्णा ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रश्न-पत्राणि

राजकीय संस्कृत महाविद्यालयः, काशी

साहित्याचार्य परीक्षायाम्

२ वर्षे २ पत्रम्

१९५०

कार्यान्विते शक्तिरितिमतं निराकृत्य शाब्दबोधे तात्पर्यज्ञानस्य कारणता संसाध्यताम् ।

१९५१

जातौ व्यक्तौ जातिविशिष्टव्यक्तौ वा शक्तिरिति निर्णीय शाब्दबोधे योग्यताज्ञानकारणता निरस्यताम् ।

१९५२

राजपुरुष इत्यादितत्पुरुषे कुत्र कीदृशी लक्षणेति विलिख्य शाब्दबोधे तात्पर्यज्ञानकारणता विस्पष्टीक्रियताम् ।

नव्यव्याकरणाचार्य परीक्षायाम्

२ वर्षे १ पत्रम्

१९५०

१. ईश्वरेच्छायाः शक्तित्वे घटादिपदात् पटादिबोधः कुतो न, इच्छाया ऐक्यात् विषयतया सर्वत्र वर्तमानाच्चेति समाधायाऽऽधुनिके नाम्नि न शक्तिरेकादशेऽहनि कृते शक्तिरित्यत्र बीजं व्याकुरुत ।

२. लक्षणा वृत्तिः कुतोऽङ्गीक्रियते ? सा किं रूपा ? कतिविधा च सा ? लक्षितलक्षणायाः उदाहरणञ्च किम् ?

अथवा

तात्पर्यज्ञानस्य बोधे कारणता कुतोऽङ्गीक्रियते ? तथा सति वैदिकशुकवाक्ययोः कथं बोधो भवतीति प्रतिपाद्यताम् ।

१९५१

१. लाक्षणिकम्पदम् नानुभावकमिति निरस्य जातावेव शक्तिरिति मतं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निराक्रियताम् ।

२. योग्यताज्ञानस्य कारणता बाधनिश्चयाभावेनान्यथासिद्धेति सम्यक् प्रदर्श्य तद्युक्तं न वेति विचार्य बाधितस्थले बोधो भवति न वेति निर्णीयताम् ।

(का.हि.वि.)

१९५२

१. शाब्दबोधस्य किम् कारणम् ? कीदृक्पदार्थोपस्थितेर्व्यापारत्वम् संस्कारानुभवाभ्याम्पदार्थोपस्थितिसम्भवे तत्र पदज्ञानस्य कथं कारणत्वम् ? शक्तिग्राहकाश्च के ?

८. आकांक्षाज्ञानतात्पर्यज्ञानयोः शाब्दबोधे कारणत्वं निरूपयत ।

१९५३

१. संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः इत्येष ग्रन्थः ससन्दर्भः पदकृत्यप्रदर्शनपुरस्सरं लेख्यः ।

२. जातावेव शक्तिः, द्वन्द्वे साहित्ये लक्षणेति मीमांसकमतद्वयं निराकृत्य योगरूढशब्दविषये मतभेदम्प्रदर्शयत ।

१९५४

१. घटादिपदानां कार्यान्वितघटादौ शक्तिरिति मतं समर्थ्य प्रत्याख्याय च तेषां घटादिमात्रे शक्तिरिति मतम्प्रसाध्यताम् ।

२. योग्यताज्ञानतात्पर्यज्ञानयोः शाब्दबोधे कारणत्वाकारणत्वे मतभेदेनोपपादयत ।

वाराणसेय संस्कृत विश्वविद्यालयः, वाराणसी

नव्यव्याकरणाचार्यपरीक्षायाम्

१९६०

१. चैत्रः पचतीत्यादावाख्यातस्य कृतौ शक्तिस्वीकारे कर्तृवाचकात् तृतीया कथं नेत्युपपाद्य कार्य्यान्वितशक्तिवादो निरसनीयः ।

२. द्वन्द्वे लक्षणा भवति न वेति ग्रन्थोक्तदिशा निरूप्य शाब्दबोधे योग्यताज्ञानस्य हेतुत्वं खण्डनीयम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१९६१

१. पङ्कजपदे शक्तिद्वयस्वरूपम्प्रदर्श्य समुदायशक्ते फलमुपस्थाप्य च शाब्दबोधे आकांक्षाज्ञानस्य प्रयोजनम्प्रदर्शनीयम् ।

१९६२

१. कार्यान्विते शक्तिं स्वीकुर्वताम् मतमुपपाद्य निराक्रियताम् ।

अथवा

तत्पुरुषे कस्मिन् पदे लक्षणेति विलिख्य शाब्दबोधे योग्यताज्ञानस्य कारणत्वं निरस्यताम् ।

१९६३

जातौ व्यक्तौ विशिष्टायां व्यक्तौ वा शक्तिरिति मतं विचार्य शाब्दबोधे तात्पर्यज्ञानस्य कारणत्वमावश्यकं न वेति निर्दिश्यताम् ।

१९६४

१. आख्यातस्य कृतौ शक्तिस्वीकारे "चैत्रः पचति" इत्यत्र चैत्रपदात् तृतीया कथं नेति विचार्य द्वन्द्वे लक्षणा भवति न वेति निश्चीयताम् ।

अथवा

गभीरायां नद्यां घोष इत्यत्र कस्मिन् पदे लक्षणेति विविच्य शाब्दबोधे आकांक्षाज्ञानस्य कारणत्वं व्यवस्थाप्यताम् ।

प्राचीन व्याकरणाचार्य परीक्षायाम्

२ वर्षे २ पत्रम्

१९६२

आकांक्षायाः स्वरूपमितरमतखण्डनपूर्वकं विलिख्य ज्ञाने बाधज्ञानस्य प्रतिबन्धकत्वमस्ति न वेति विविच्यताम् ।

१९६३

१. सङ्केत भेदपुरस्सरमीश्वरसङ्केतस्य शक्तित्वं निरस्यताम् ।

२. पदानां शक्यत्वे दोषदिग्दर्शनपुरस्सरं तदशक्यत्वमुपपाद्य पदशक्तिज्ञाने

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वाक्यशक्तिज्ञानस्योपजीव्यत्वं निराकरणीयम् ।

३. पदवाक्यैकदेशयोः शक्तिस्वीकारे फलमभिधाय पदज्ञानाज्ञानयोः वक्तृनिष्ठत्वं श्रोतृनिष्ठत्वञ्च ग्रन्थोक्तदिशा दूषणीयम् ।

४. योग्यतास्वरूपमुक्त्वा तस्याः शाब्दबोधे कारणत्वं दत्त्वा तज्ज्ञाने फलमस्ति न वेत्यभिधेयम् ।

५, शाब्दबोधे तात्पर्यज्ञानस्य कारणत्वमुपस्थाप्य निराकरणीयम् ।

१९६४

१. नानार्थेषु शब्देषु शक्तिनियामकाः के ? कथञ्चेति सुस्पष्टं लिखत ।

२. द्विरेफपदे का लक्षणा ? कथञ्चेति दर्शयत ।

२. तात्पर्यविचारम्प्रदर्श्य जातौ व्यक्तौ विशिष्टे वा शक्तिरिति निर्णीयताम् ।

४. अपभ्रंशेषु शक्तिरस्ति न वेति विलिख्य कतिविधः शब्दः कानि च तदुदाहरणानीति प्रतिपादयत ।

साहित्याचार्यपरीक्षायाम्

२ वर्षे ४ पत्रम्

१९६५

१. शक्तिग्रहोपायाः सोदाहरणा निरूप्यन्ताम् ।

अथवा

कार्यान्विते शक्तिरिति मतं विवृत्य निराक्रियताम् ।

२. लक्षणालक्षणं तद् भेदांश्च सोदाहरणं प्रतिपाद्यन्ताम् ।

अथवा

"निषादस्थपतिं याजयेत्" इत्यत्र वाक्यार्थस्तथा निर्णीयताम् यथा वृत्तिविचारः स्फुटीभवेत् ।

१९६६

१. जातिशक्तिवादं निराकृत्य न्यायमतम् प्रतिष्ठाप्यताम् ।

अथवा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पदस्फोटवादं समुपन्यस्य न्यायनयमाश्रित्य स परीक्ष्यताम् ।

२. शाब्दबोधे यानि कारणानि भवन्ति तानि विव्रियताम् ।

अथवा

तात्पर्यज्ञानस्य शाब्दबोधकारणता सूपपाद्यताम् ।

१९६७

१. आख्यातस्य कथम् कुत्र शक्तिरिति विविच्य सोदाहरणमाख्यातार्थघटितः शाब्दबोधः प्रदर्श्यताम् ।

अथवा

कार्यान्विते शक्तिरिति मतं विवृत्य तत् परीक्ष्यताम् ।

२. सोदाहरणं लक्षणालक्षणं विलिख्य तद् भेदाः प्रदर्श्यन्ताम् ।

अथवा

वाक्यलक्षणावादं स्पष्टीकृत्य खण्डयताम् ।

१९६७ (विशेष परीक्षा)

१. शाब्दबोधप्रक्रिया सोदाहरणं प्रदर्श्यताम् ।

अथवा

जातिशक्तिवादो निराक्रियताम् ।

२. समासे शक्तिः स्वीक्रियते न वेति विचार्यताम् ।

अथवा

स्फोटवादो निरस्यताम् ।

१९६८

१. शाब्दबोधे शक्तिज्ञानस्य कीदृश उपयोगः ? पदार्थस्याऽशक्यस्यापि शाब्दबोधे मानं भवितुमर्हति न वेति परीक्ष्यताम् ।

अथवा

अन्वयानुपपत्तेरेव लक्ष्यार्थबोधनियामकत्वं भवितुमर्हति न वेति विचारणीयम् ।

२. आख्यातस्य कर्ता अर्थं इति वदतां मतमुपपाद्य नैयायिकसम्मतोऽर्थस्तं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुविशदं निरूप्यताम् ।

अथवा

व्याख्यायताम्—

निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात् । अन्यथा राजा पुरुषः इत्यत्रापि तथान्वयबोधः स्यात् ।

१९७०

१. शक्तिग्रहस्य कारणानि विलेख्यानि ।

अथवा

शक्तेः स्वरूपं विविच्यताम् ।

२. जातौ शक्तिर्व्यक्तौ वा जातिविशिष्टव्यक्तौ वेति किं मतं रुचिकरं युक्तियुक्तञ्चेति प्रतिपाद्यताम् ।

अथवा

शाब्दबोधम्प्रति कानि कारणानीति विलिख्यताम् ।

१९७१

१. "पदज्ञानं तु करणमि" त्यादिकारिका व्याख्येया ।

अथवा

चैत्र इव मैत्रो गच्छतीत्यत्र कीदृशः शाब्दबोधः ?

२. लक्षणावृत्तिः स्फुटं लक्षणीया ।

अथवा

योग्यताज्ञानस्वरूपम्प्रतिपाद्य तस्य शाब्दबोधम्प्रति कारणत्वं न वेति विशदरीत्या निरुच्यताम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शास्त्रपरीक्षायाम्

नव्यव्याकरणविषये

२ वर्षे २ पत्रम्

१९६५

१. व्यवहारस्य शक्तिग्राहकत्वं सोदाहरणम्प्रदर्श्य कार्यान्वितेऽन्विते वा शक्तिरिति मतं निरस्यताम् ।

२. व्याकरणेन शक्तिग्रहस्वीकारेऽपि नैयायिकैस्तिङां कृतावेव शक्तिः कथं स्वीक्रियते ? कथन्न तन्मते चैत्रादिपदात् तृतीया ? किन्नाम संख्याभिधानयोग्यत्वम् कथञ्च लक्षणस्य पदानां सार्थक्यम् ? एतत् सर्वमभिधाय सोदाहरणं पदभेदाः निरूपणीयाः ।

१९६६

१. पदानां जातौ व्यक्तौ वा शक्तिरिति पक्षद्वयमुत्थापनपूर्वकम् खण्डयित्वा विशिष्टे शक्तिर्व्यवस्थाप्यताम् ।

२. का नाम लक्षणा ? किञ्च तद्बीजम् ? केच तद्भेदाः ? सर्वं निरूप्य योग्यतालक्षणं सोदाहरणं कथयत ।

१९६७

१. सविस्तरं पदचातुर्विध्यं निरूप्य लक्षणायामन्वयानुपपत्तिर्वा बीजमिति निश्चीयताम् ।

१९६७ (विशेष परीक्षा)

शाब्दबोधे कारणीभूतानामासत्यादिचतुर्णां लक्षणमुदाहरणञ्च प्रदर्शनीयम् ।

१९६८

१. आख्यातस्य कर्तरि कृतौ वा शक्तिरिति मुक्तावलीदिशा निर्णीयताम् ।

२. "लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः" कारिकेयं व्याख्यायताम् ।

१९६९

१. पदानां जातौ व्यक्तौ वा उभयत्र वा शक्तिरिति सम्यग् निरूप्यताम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

२. लक्षणायाः स्वरूपमभिधाय द्वन्द्वसमासे सा अङ्गीक्रियते न वेति विचार्यताम् ।

शास्त्रिपरीक्षायाम्

नव्यव्याकरणविषये २ वर्षे २ पत्रम्

१९७१

१. सप्रपञ्चम् पदचातुर्विध्यं निरुच्य लक्षणायामन्वयानुपपत्तिः तात्पर्यानुपपत्तिर्वा बीजमिति निश्चीयताम् ।

२. शाब्दबोधे कारणानि प्रदर्श्य मतभेदेन आसत्तेः कारणत्वं सविस्तरमभिधीयताम् ।

१९७२

शास्त्रिपरीक्षायाम्

२ वर्षे

क वर्गे नव्यव्याकरणविषये

५ पत्रम्

सिद्धान्तमुक्तावल्याः शब्दखण्डे प्रश्नाः

१. शक्तेः स्वरूप तद्ग्राहकांश्च सामान्यतः प्रदर्श्य व्याकरणस्य शक्तिग्राहकत्वं क्व त्यज्यत इति साधु प्रतिपाद्यताम् ।

२. जातौ शक्तिग्रहो व्यक्तौ वेति निरूप्य तात्पर्यस्वरूपं प्रदर्श्यताम् ।

३. अधोनिर्दिष्टेषु यथेच्छं त्रीणि वाक्यानि सावतरणं व्याख्येयानि—

लक्ष्यतावच्छेदके न लक्षणा ।

योग्यताज्ञानं न शाब्दबोधे हेतुः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१९७३

शास्त्रिपरीक्षायाम्

क वर्गे नव्यव्याकरणविषये

२ वर्षे ५ पत्रम्

सिद्धान्तमुक्तावल्याः शब्दखण्डे प्रश्नाः

"ख" भागे

१. ईश्वरेच्छायाः शक्तित्वे घटादिपदात् पटादिबोधः कुतो न, इच्छाया ऐक्यात् इति समाधाय आधुनिके नाम्नि न शक्तिः, एकादशेऽहनि कृते शक्तिरित्यत्र-बीजं विलिख्यताम् ।

२. चैत्रः पचतीत्यादौ आख्यातस्य कृतौ शक्तिस्वीकारे कर्तृवाचकात् तृतीया कथं नेति प्रतिपाद्य कार्यान्वितशक्तिवादो निराक्रियताम् ।

३. तात्पर्यज्ञानस्य बोधे कारणता कुतोऽङ्गीक्रियते तथा सति वैदिकशुवाक्ययोः कथं बोधो भवतीति प्रतिपाद्यताम् ।

१९७४

शास्त्रिपरीक्षायाम्

क वर्गे नव्याकरणविषये

द्वितीयवर्षे पञ्चमपत्रम्

सिद्धान्तमुक्तावल्याः शब्दखण्डे प्रश्नाः

१. पदानां जातौ शक्तिरिति मीमांसकमतमुपपाद्य खण्डयत । नैयायिकमते कुत्र तेषां शक्तिरित्युपपाद्यताम् ।

२. लक्षणावृत्तिः कुतोऽङ्गीक्रियते, सा किं रूपा, कतिविधा च, लक्षित-लक्षणाया उदाहरणं च किमिति निरूपयत ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी

१९७५

शास्त्रिपरीक्षायाम्

द्वितीय वर्षे

क वर्गे नव्यव्याकरणविषये पञ्चमपत्रम्

सिद्धान्तमुक्तावल्याः शब्दखण्डे प्रश्नाः

१. वैयाकरणैराख्यातस्य शक्तिः क्व कथमभ्युपगम्यते ? कथं तन्नैयायिकैर्नानुमन्यते ? कथं च नैयायिकमते चैत्रेण पचतीत्यादिप्रयोगो नापद्येतेति सोपपत्ति विविच्यताम् ।

२. अधोनिर्दिष्टानि वाक्यानि सावतरणं व्याख्येयानि—

(ख) लक्ष्यतावच्छेदके न लक्षणा ।

(ग) योग्यताया ज्ञानं शाब्दज्ञाने न कारणम् ।

१९७६

शास्त्रिपरीक्षायाम्

द्वितीय वर्षे

क वर्गे नव्यव्याकरण विषये पञ्चम पत्रम्

सिद्धान्तमुक्तावल्याः शब्दखण्डे प्रश्नाः

१. लक्षणाया लक्षणं विलिख्य अन्वयानुपपत्तिः कथं लक्षणाबीजं न भवति इति प्रतिपादयत ।

२. योग्यताज्ञानस्य आकाङ्क्षाज्ञानस्य च शाब्दबोधकारणत्वास्वीकारे का हानिः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वाराणसेय संस्कृत विश्वविद्यालयः, वाराणसी

१९७२

आचार्यपरीक्षायाम्

साहित्य विषये

२ वर्षे ४ पत्रम्

मुक्तावल्याः शब्दखण्डे प्रश्नाः

१. पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥
कारिकैषा सुस्पष्टं व्याख्येया ।

अथवा

शक्तिग्रह प्रकाराः प्रदर्शनीयाः ।

२. कानि शाब्दबोधकारणानि स्वीकृतानीति समुत्तरणीयम् ।

१९७२

आचार्यपरीक्षायाम्

प्राचीन व्याकरणविषये

३ वर्षे ३ पत्रम्

न्यायसिद्धान्तमुक्तावल्याः शब्दखण्डे प्रश्नाः

१. शक्तेः स्वरूपं निरूप्य तद्ग्रहोपायान् संक्षिप्य ब्रूत ।

२. ग्रन्थकृदभिमतं लक्षणास्वरूपं सोदाहरणं ब्रूत ।

३. समासेऽतिरिक्तशक्त्यनङ्गीकारे-राजपुरुषः, प्राप्तोदको ग्रामः इत्यत्र शाब्दबोधः क इति सुस्पष्टमभिधीयताम् ।

४. योग्यताकांक्षयोस्स्वरूपं निर्दिश्य शाब्दबोधेऽनयोर्हेतुताविषये स्वाभिमतम्प्रकटयत ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१९७३
आचार्यपरीक्षायाम्
साहित्यविषये
द्वितीय वर्षे चतुर्थपत्रम्
मुक्तावल्याः शब्दखण्डे प्रश्नाः

१. पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलन्तत्र शक्तिधीः सहकारिणी,
कारिकैषा साधु व्याख्येया ।

२. शक्तिग्रहप्रकाराः वर्णनीयाः ।
जातेः शक्यत्वमाशङ्क्य निराक्रियताम् ।

१९७३
आचार्यपरीक्षायाम्
प्राचीन व्याकरणे
तृतीय वर्षे तृतीय पत्रम्

न्यायासिद्धान्तमुक्तावल्याः शब्दखण्डे प्रश्नाः

१. पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलन्तत्र शक्तिधीः सहकारिणी ॥
ग्रन्थसरणिमधिकृत्य कारिकेयं व्याख्यायताम् ।

२. जातौ व्यक्तौ वा शक्तिग्रहः—विषयमिमं साधकबाधकयुक्तिभिर्व्यक्तं प्रतिपादयत ।

३. लक्षणावृत्तितो लक्षितलक्षणायां को विशेषः, किञ्च तस्या उदाहरणञ्च सर्वमिदं सविस्तरं निरूपयत ।

४. आसत्तेः स्वरूपं निरूच्य, तस्याः शाब्दबोधे कारणता कथं ग्रन्थकारैरूपपादितेति सम्यग् विव्रियताम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१९७४

आचार्यपरीक्षायाम्

साहित्यविषये

द्वितीय वर्षे चतुर्थपत्रम्

१. शक्तिग्रहप्रकाराः वर्णनीयाः ।

अथवा

जातेः शक्यत्वमाशङ्क्य निरसनीयम् ।

२. कानि शाब्दबोधकारणानि स्वीकृतानीति समुत्तरणीयम् ।

१९७४

आचार्यपरीक्षायाम्

प्राचीन व्याकरणविषये

तृतीयवर्षे तृतीयपत्रम्

न्यायसिद्धान्तमुक्तावल्याः शब्दखण्डे प्रश्नाः

१. शक्तेर्लक्षणं सुष्ठु परीक्ष्य, के शक्तिग्रहोपायाः इति यथाग्रन्थं सोदाहरणं विविच्यताम् ।

२. पदानि कतिविधानि ? लक्षणोदाहरणपुरस्सरं मुक्तावलीदिशोपन्यस्यताम् ।

अथवा

शाब्दबोधे आकांक्षातात्पर्ययोः कारणत्वमस्ति न वेति यथाग्रन्थमुपपाद्यताम् ।

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः वाराणसी ।

१९७५

आचार्यपरीक्षायाम्

तृतीय वर्षे

प्राचीनव्याकरणविषये तृतीय पत्रम्

न्यायसिद्धान्तमुक्तावल्याः शब्दखण्डे प्रश्नाः

१. मुक्तावलीप्रदर्शितपथेन शाब्दबोधप्रकारो वर्णनीयः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथवा

"लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः" इयं कारिका लक्षणाविवेचनपुरस्सरं साधु व्याख्येया ।

२. जातिशक्तिवादो निरूपणीयः ।

सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी

१९७५

आचार्यपरीक्षायाम्

प्रथम वर्षे

साहित्यविषये प्रथमपत्रम्

मुक्तावल्याः शब्दखण्डे प्रश्नाः

१. जातिशक्तिवादमतं सम्यगुपपाद्य निराक्रियताम् ।

अथवा

व्याकरणाद् व्यवहाराद्वा शक्तिग्रहः कथं भवतीति प्रतिपाद्यताम् ।

२. योग्यताज्ञानस्य शाब्दबोधकारणत्वं सम्भवति न वेत्यत्र ग्रन्थकारस्य सम्मतिः प्रस्तूयताम् ।

अथवा

लक्षणायाः लक्षणमुल्लिख्य लक्ष्यतावच्छेदके लक्षणा सम्भवति न वेति विचार्यताम् ।

१९७६

आचार्यपरीक्षायाम्

तृतीय वर्षे

प्राचीनव्याकरणविषये तृतीय पत्रम्

न्यायसिद्धान्तमुक्तावल्याः शब्दखण्डे प्रश्नाः

१. शक्तिस्वरूपं निरूप्य कर्तुं शक्तिवादो युक्त्या निरसनीयः ।

२. 'एतेन तावद् वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तः" इति वाक्यस्य विशदाशयो वर्णनीयः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१९७६

आचार्यपरीक्षायाम्

प्रथम वर्षे

साहित्यविषये प्रथमपत्रम्

मुक्तावल्याः शब्दखण्डे प्रश्नाः

१. अन्वयानुपपत्तिर्लक्षणाबीजमिति कस्य मतम् ? तत्स्वीकारे को दोषः इति यथाग्रन्थं विचार्यताम् ।

२. आख्यातस्य कर्तरि कृतौ वा शक्तिरिति निश्चीयताम् ।

अथवा

तात्पर्यज्ञानस्य वृत्तित्वं शाब्दबोधकारणत्वञ्च निराक्रियेताम् ।

परिशिष्टम्

शब्दखण्डान्तर्गता कारिकावली

पदज्ञानन्तु करणं द्वारन्तत्र पदार्थधीः ।
शाब्दबोधः फलन्तत्र शक्तिधीः सहकारिणी ॥
लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः ।
आसत्तिर्योग्यताऽऽकांक्षातात्पर्यज्ञानमिष्यते ॥
कारणं, सन्निधानन्तु पदस्याऽऽसत्तिरुच्यते ।
पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ॥
यत्पदेन विना यस्याऽननुभावकता भवेत् ।
आकांक्षा, वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुक्तावली टीकान्तर्गता कारिका सूची

क्रमांकाः	कारिकाः	पृष्ठाङ्काः
१.	यद्यदाकांक्षितं योग्यम्...	...४२
२.	वसन्ते सर्वसस्यानां	...१६
३.	वृद्धाः युवानः शिशवः	...४२
४.	शक्तिग्रहम् व्याकरणोपमान	...६

लक्ष्मीटीकान्तर्गता श्लोकसूची

१.	अनेकव्यक्त्यभिव्यङ्ग्या	...४२
२.	अमन्दानन्दसन्दोह...	...१
३.	न्यायतत्त्वविमर्शेन	...१
४.	पदे न वर्णाः विद्यन्ते	...४४
५.	मातरम्पितरञ्चैव	...१
६.	मुक्तावलीशब्द	...१
७.	शब्दार्थयो रहस्यानां	...१
८.	समासे खलु भिन्नैव	...३

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परिशिष्टम्

शब्दमहत्त्वव्यञ्जकसूक्तयः

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश ॥
सुदेवोऽसि वरुण यस्य ते सप्तसिन्धवः ।
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥
इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥

शब्दार्थप्रत्ययानामितरेतराध्यासात् संकरः—
तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम् ॥
सर्वेषां तु नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥
सिद्धे शब्दार्थसम्बन्धे ।
लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः ॥
एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः—
सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति ॥
आप्तोपदेशसामर्थ्याच्छब्दार्थसम्प्रत्ययः ॥
आकाशवायुप्रभवः शरीरात्
समुच्चरन् वक्त्रमुपैति नादः ।
स्थानान्तरेषु प्रविभज्यमानो
वर्णत्वमागच्छति यः स शब्दः ॥
तमक्षरं ब्रह्म परं पवित्रं
गुहाशयं सम्यगुशन्ति विप्राः ।
स श्रेयसा चाभ्युदयेन चैव
सम्यक् प्रयुक्तः पुरुषं युनक्ति ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥
न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत ॥
शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी ।
यन्नेत्रः प्रतिभात्माऽयं भेदरूपः प्रतीयते ॥
अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः ।
तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ॥
इति कर्तव्यता लोके सर्वा शब्दव्यपाश्रया ।
याम्पूर्वाहितसंस्कारो बालोऽपि प्रतिपद्यते ॥
लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना ।
स्थानेष्वभिहतो वायुः शब्दत्वम्प्रतिपद्यते ॥
तस्य कारणसामर्थ्याद् वेगप्रचयधर्मणः ।
सन्निपाताद् विभज्यन्ते सारवत्योऽपि मूर्तयः ॥
अणवः सर्वशक्तित्वाद् भेदसंसर्ग वृत्तयः ।
छायातपतमःशब्दभावेन परिणामिनः ॥
स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः ।
अभ्राणीव प्रचीयन्ते शब्दाख्याः परिमाणवः ॥
अथाऽयमान्तरो ज्ञाता सूक्ष्मे वागात्मनि स्थितः ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥
स मनोभावमापद्य तेजसा पाकमागतः ।
वायुमाविशति प्राणमथासौ समुदीर्यते ॥
अन्तःकरणतत्त्वस्य वायुराश्रयतां गतः ।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते ॥
विभजन् स्वात्मनो ग्रन्थीन् श्रुतिरूपैः पृथग्विधैः ।
प्राणो वर्णानभिव्यज्य वर्णेष्वेवोपलीयते ॥

॥ इति परिशिष्टम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

१—
ज..

२ . न्याय,
ज्योतिष, धर्मशास्त्र राजन
शास्त्रों की रक्षा करना ।

३— संस्कृत भाषा का प्रचार

४—संस्कृत, पालि प्राकृत त
अप्रकाशित ग्रन्थों का प्र

५— विदेशी भाषाओं में कला
पर उपलब्ध उत्तम सा
प्रकाशित करना ।

६— संस्कृत भाषा के ग्रन्थो
तथा वैदिक सिद्धान्तों
करना ।

७— छात्रोपयोगी दुर्ल
कराना ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi